< सप्तमोऽङ्कः >

अभिज्ञानशाकुन्तलम्

(ABHIJÑĀNAŚĀKUNTALAM)

डॉ. वेद प्रकाश शास्त्री

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तमोऽङ्कः

(ततः प्रविशत्याकाशवर्त्मना रथारूढो राजा मातलिश्च)

राजा—मातले! अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये।

मातलिः—(सस्मितम्) आयुष्मन्! उभयत्राप्यसन्तोषमवगच्छ! कुतः—

उपकृत्य हरेस्तथा भवान् लघु सत्कारमवेक्ष्य मन्यते।
गणयत्यवदानसम्मितां भवतः सोऽपि न सत्क्रियामिमाम्॥ १॥

(ततः=तदनन्तरम्, आकाशवर्त्मना=आकाशमार्गेण, रथारूढः=स्यन्दनारूढः, राजा=दुष्यन्तः, मातलिश्च=इन्द्रसारथिश्च।)

राजा—मातले! अनुष्ठितः=प्रतिपालितः, निदेशः=आज्ञा, येन सः अनुष्ठितनिदेशः, अपि, मघवतः=इन्द्रस्य, सत्क्रियाविशेषात्=सम्मानातिशयात्, अनुपयुक्तमिव=अयोग्यमिव आत्मानं, समर्थये=सम्भावयामि। (इन्द्रं प्रति यन्मया कार्यं कृतं तदिन्द्रसम्माननायाः सहस्रांशेनापि तुलयितुं न क्षममिति भावः।)

मातलिः—(सस्मितम्=सेषद्धासम्) आयुष्मन्! उभयत्रापि=भवति मघवति च (उभयपक्षे), असन्तोषम्=अपरितोषम्, अवगच्छ। कुतः—

अन्वयः—भवान् हरेः तथा उपकृत्य सत्कारम् अवेक्ष्य लघु मन्यते। तथा सः अपि इमां सत्क्रियां भवतः अवदानसम्मितां न गणयति॥ १॥

उपकृत्येति। भवान्=आयुष्मान् (राजा दुष्यन्तः), हरेः=इन्द्रस्य, तथा= दुर्जयदानवहननात्मकव्यापारसाधनद्वारा, उपकृत्य=उपकारं कृत्वा, अभीष्टं पूरयित्वा, सत्कारं=परमसन्तुष्टेनेन्द्रेण कृतं

(इसके पश्चात् आकाशमार्ग से रथ पर सवार राजा और मातलि का प्रवेश)

राजा—मातलि! यद्यपि मैंने देवराज की आज्ञा का पालन किया है तथापि उन्होंने जो मेरा सम्मान किया है, मैं स्वयं को उसके योग्य नहीं मानता।

मातलि—आयुष्मन्! असन्तोष दोनों ओर है, यह समझो। क्योंकि आप इस प्रकार इन्द्र का उपकार करके भी अपनी सेवा को तुच्छ समझते हैं और उधर देवराज भी इस (स्वकृत) सम्मान को आपके उपकार की तुलना में सर्वथा तुच्छ (नगण्य) मानते हैं॥ १॥

(Then enter along the aerial path the king mounted on a chariot and Mātalī)

The king—Mātalī! Although I have executed the command of Indra, I deem myself to be as though of no use (to him), owing to the special honour of Indra.

Mātali—Long-lived one! both of you are dissatisfied (please rember). For—

You think lightly of the prior obligation (conferred by you) on Indra by reason of the honour (done to you by him). He on his part considers this honour very poor or light. (1)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—मातले! मा मैवम्। स खलु मनोरथानामपि दूरवर्त्ती, यो विसर्जनावसरे सत्कारः। मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य।

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा॥ २॥

सम्भावनम्, अवेक्ष्य=अवलोक्य, लघु=स्वल्पम्, मन्यते=सम्भावयति। तथा सः=हरिरपि, इमाम्=स्वकृताम्, सत्क्रियाम्=सत्कारम्, भवतोऽवदानेन=दुर्जयदानवसमुदायहननरूपव्यापारेण, सम्मिताम्=उपयुक्ताम्, भवतः अवदानसम्मिताम्, न गणयति=न मन्यते। तथा चापरस्मिन् पक्षे इन्द्रस्याप्यसन्तोष एवेति भावः। अत्र सूक्ष्मालङ्कारः॥ १॥

भावार्थः—भवान् इन्द्रस्य तथाविधं दुर्जयदानवहननात्मकम् अभीष्टं सम्पाद्य, परमसन्तुष्टेनेन्द्रेण कृतं सत्कारमवेक्ष्य स्वकीयकृत्यं स्वल्पं मन्यते तथा च परस्मिन् पक्षे इन्द्रोऽपि स्वकृतां सत्क्रियां भवतोऽवदानसम्मितां न गणयति। (इन्द्रं प्रति यन्मया कार्यं कृतं तदिन्द्रसम्मानायाः सहस्रांशेनापि तुलयितुं न क्षमम् इति भावः।)॥ १॥

राजा—मातले=देवराजसारथे! मा मैवम्=एवं मा ब्रूहि। विसर्जनावसरे=मम प्रस्थापनकाले, यः सत्कारः=समाननं, वासवेन कृतम्, स खलु=सत्कारः, मनोरथानाम्=अभिलाषाणामपि, दूरवर्ती=अगोचरः। हि=यस्मात्, द्यौः=स्वर्गः, ओकः=वासस्थानम्, येषां तेषां दिवौकसाम्= देवानाम्, समक्षम्=प्रत्यक्षमास्थानमण्डपे, अर्द्धासने=स्वासनार्द्धभागे, उपवेशितस्य=इन्द्रेण स्वयं गृहीत्वा निवेदितस्य, मम इत्यस्य श्लोकेन सहान्वयः—

अन्वयः—अन्तिकस्थम् अन्तर्गतप्रार्थनं जयन्तम् उत वीक्ष्य कृतस्मितेन हरिणा आमृष्टवक्षोहरिचन्दनाङ्काः मन्दारमाला पिनद्धा॥ २॥

अन्तर्गतेति। अन्तिकस्थं=समीपवर्त्तिनं, अन्तर्गता=हृद्गता, प्रार्थना=मन्दारमालाविषयिणी

राजा—मातलि! नहीं ऐसा नहीं है। विदा करते समय उन्होंने जो मेरा सम्मान किया वह आशातीत था। उन्होंने देवताओं के सामने अपने आधे आसन पर बिठाये हुए—

मन्दारमाला के लिए मन-ही-मन अभिलाषा रखने वाले, अपने पास में ही बैठ गये। पुत्र जयन्त को देखकर किञ्चित् मुस्कराते हुए अपने वक्ष पर पड़ी हुई हरिचन्दन से लिप्त मन्दारपुष्पों (पारिजात) की माला देवराज ने मुझे पहना दी। अर्थात् अपने पुत्र की उपेक्षा कर यह सम्मान मुझे प्रदान किया॥ २॥

King—Mātalī! no, not say so. The honour (bestowed to me) at the time of bidding me farewell was, indeed, beyond the expectations of even my fondest desires. For on me, who was made to sit on half his seat, in the presence of Gods.

Was fastened a garland of mandāra flowers, marked with the celestial sandal called Hari candan on his chest that was rubbed off by it by Indra, who indulged in a smile, as he looked at his son Jayanta, who was sitting near and who had an inward longing for the same garland or for such distenction. (2)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—किमिव नायुष्मानमरेश्वरादर्हति ? पश्य—

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम्।
तव शरैरधुना नतपर्वभिः पुरुषकेशरिणश्च पुरा नखैः ॥ ३ ॥

याच्ञा, यस्य तम् अन्तर्गतप्रार्थनम्, जयन्तम्=तन्नामकं स्वतनयम्, उत=अधिकम्, वीक्ष्य=दृष्ट्वा, उद्वीक्ष्य (तदन्तर्गतप्रार्थनां ज्ञात्वापि), कृतस्मितेन=कृतमन्दहासेन, हरिणा=इन्द्रेण, आमृष्टस्य= संश्लिष्टस्य, वक्षोहरिचन्दनस्य=वक्षःस्थललिप्तसुरलोकसुलभचन्दनविशेषस्य, अङ्कः=चिह्नं, यस्याः सा हरिचन्दनाङ्का, मन्दारमाला=मन्दारनामकदेवतरुकुसुमस्रक्, पिनद्धा=मम कण्ठे परिधापिता। अत्र उदात्तालङ्कारः परिकरालङ्कारश्च। उपजातिर्वृत्तम् ॥ २ ॥

भावार्थः—सर्वेषां देवानां समक्षं स्वपुत्रमप्यविगणय्येदृशसम्मानकरणं ममाशातीतमिति भावः ॥ २ ॥

मातलिः—आयुष्मान्=भवान् (प्रशस्तायुःशाली), अमरेश्वरात्=देवाधिपतेः, आदातुमिति शेषः, किमिव नार्हति=सर्वमेव वस्तु आदातुं योग्यो भवति। पश्य=अवलोकय—

अन्वयः—अधुना नतपर्वभिः तव शरैः तथा पुरा नतपर्वभिः पुरुषकेशरिणः नखैः इत्युभयैः सुखपरस्य हरेः त्रिदिवम् उद्धृतदानवकण्टकं कृतम् ॥ ३ ॥

सुखेति। अधुना=इदानीम्, नतानि=किञ्चिदाकुञ्चितानि, पर्वाणि=ग्रन्थिदेशाः, येषां तैः नतपर्वभिः, तव, शरैः=बाणैः (दुर्जयदानवगणहननादिति भावः), तथा पुरा=पूर्वस्मिन् काले, नतानि=किञ्चित् कुञ्चितानि, पर्वाणि=अङ्गुलिपर्वभागाः, येषां तैः नतपर्वभिः, पुरुषश्चासौ केशरी चेति तस्य पुरुषकेशरिणः=नृसिंहस्य भगवतः, नखैः=नखरैश्च (हिरण्यकशिपोर्विदारणात्), इत्युभयैः कर्तृभिः, सुखे परः सुखपरस्तस्य अथवा सुखमेव परं यस्य तस्य सुखपरस्य=केवलसुखभोगासक्तस्य, हरेः=इन्द्रस्य, त्रिदिवं=त्रयः ब्रह्माविष्णुमहेशाः दीव्यन्ति यत्र तत् त्रिदिवम्=स्वर्गधाम, यद्वा—त्रिदिवं=सुखं विद्यते यत्र तत् त्रिदिवम्, उद्धृतम्=अपसारितम्, दानवरूपं कण्टकं यस्मात् तत् उद्धृतदानवकण्टकम्, कृतम्। अत्र दीपकालङ्कारः, द्रुतविलम्बितं वृत्तम् ॥ ३ ॥

भावार्थः—येन त्वया सम्प्रति नतपर्वभिः शरः सुखपरस्य इन्द्रस्य स्वर्गं दानवकण्टकमुद्धृत्य निष्कण्टकं कृतम्, तथा येन नृसिंहरूपधारिणा विष्णुना नतपर्वभिर्नखैः हिरण्यकशिपोर्विदारणात् सुखपरस्य इन्द्रस्य धाम निष्कण्टकं कृतं, तस्य कृते न किमपि अदेयमस्ति देवराजकृते। अत आयुष्मानमरेश्वरात् किमिव नार्हतीति भावः ॥ ३ ॥

मातलि—आयुष्मान्! आप देवराज से क्या नहीं पा सकते। देखिए—

इस समय झुका हुआ है ग्रन्थिभाग जिनका ऐसे आपके बाणों ने तथा पूर्वकाल में भगवान् नृसिंह के कुछ झुके हुए नाखूनों ने सुखभोग में लिप्त देवराज के स्वर्गधाम के दानव रूपी कण्टकों को दूर किया है (अतः आप उनसे सब कुछ पाने के अधिकारी हैं) ॥ ३ ॥

Mātali—What possibly does the long-lived one not deserve from the lord of immortals? Behold—

The heaven of Indra, who is addicted to pleasure, has been rendered free from the thorns of demons that were uprooted, by two—now by your arrows, of which the joints are smooth (bent) and formerly by the claws of man-lion i.e. Lord Narsimha. (3)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—तत्र खलु शतक्रतोरेव महिमा। पश्य—

सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम्।
किं प्राभविष्यदरुणस्तमसां वधाय
तञ्चेत् सहस्रकिरणो धुरि नाकरिष्यत्॥४॥

मातलिः—सदृशन्तवैतत्। (स्तोकमन्तरमतीत्य) आयुष्मन्! इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः।

राजा—तत्र=मत्कर्तृकदानवोद्धरणे, शतक्रतोः=इन्द्रस्यैव, महिमा=माहात्म्यं, न मम इति। पश्य—

अन्वयः—नियोज्याः महत्सु अपि कर्मसु यत् सिद्ध्यन्ति तम् ईश्वराणां सम्भावनागुणम् अवेहि। अरुणः तमसां वधाय किं प्राभविष्यत् चेत् सहस्रकिरणः तं धुरि न अकरिष्यत्॥४॥

सिद्ध्यन्तीति। नियोज्याः=नियोक्तुं योग्याः किङ्कराः, महत्सु=गुरुतरेष्वपि, कर्मसु=व्यापारेषु, यत् सिद्ध्यन्ति=कृतकार्य्या भवन्ति, तम्, ईश्वराणां=प्रभूणां, सम्भावनायाः=बहुमानस्य, गुणम्=अङ्गम्, अथवा प्रभूणां प्रभावमाहात्म्यम्, अवेहि=अवगच्छ। (पश्य) अरुणः=सूर्यसारथिः, तमसां=तिमिराणाम्, वधाय=ध्वंसाय, किं प्राभविष्यत्=किं समर्थोऽभविष्यत्? नैव, चेत्=यदि, सहस्रकिरणः (सहस्रं किरणा यस्य सः)=सूर्य्यः, तम्=अरुणम्, धुरि=अग्रे (यात्रामुखे), न अकरिष्यत्=कथमपि नैव। अत्र अप्रस्तुतप्रशंसालङ्कारः। वसन्ततिलकं वृत्तम्॥४॥

भावार्थः—सूर्यस्य प्रभावेणैवारुणकृततमसो नाश इव इन्द्रस्य प्रभावेणैव अस्मत्कृतदानवविनाशो जातः। अत एव एतत् सर्वम् इन्द्रस्यैव प्रभावमाहात्म्यम्॥४॥

मातलिः—एतत्=कथनम्, तव=भवतः (महत्पुरुषस्य पक्षे), सदृशम्=उपयुक्तम्

राजा—उस कार्य (दानव-विनाश) में भी देवराज की महिमा ही कारण है। देखिये—

किसी कार्य के लिए नियुक्त व्यक्ति यदि उस महत्त्वपूर्ण कार्य को करने में सफल हो जाय तो उसमें उस व्यक्ति का नहीं, अपितु उसके स्वामी की महत्ता का गुण ही कारण हुआ करता है। (देखो जैसे) यदि सूर्य अरुण (सारथी) को अपने आगे न बिठायें तो क्या उसमें (अरुण में) अन्धकार नष्ट करने की सामर्थ्य आ सकती है?॥४॥

मातलि—आपका यह कथन सर्वथा आपके अनुरूप ही है। (कुछ दूर चलकर) आयुष्मन्! इधर देखिए—स्वर्ग पर प्रतिष्ठित आपका यश कितना सुन्दर दीख रहा है—

The king—In this matter really the might of Indra alone is to be praised or main cause. See—

If a person succeeds in the work alloted to him, it is the effect of the greatness of masters. Could else Aruṇa have become the piercer of darkness, had the thousand-rayed (sun) not placed him on the yoke of his chariot? (4)

Mātali—This is quite worthy of the long-lived one.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु।
सञ्चिन्त्य गीतिक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति॥ ५॥

राजा—मातले! असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितोऽयं प्रदेशो मया, तत् कतमस्मिन् पथि वर्त्तामहे मरुताम्।

(महत्पुरुषस्यैव विनयनम्रतादेरौचित्यादिति भावः)। (स्तोकम्=स्वल्पम्, अन्तरम्=अवकाशम्, अतीत्य=अतिक्रम्य) आयुष्मन्!=प्रशस्तायुःशालिन्! इतः=निर्दिश्यमानायां दिशि, नाकपृष्ठे=स्वर्गतले, प्रतिष्ठितस्य=सर्वदा स्थिरत्वेन प्रतिष्ठां प्राप्तस्य, आत्मनो यशसः=स्वकीययशसः, सौभाग्यम्=समधिकभाग्यवत्वम्, पश्य।

अन्वयः—अमी दिवौकसः गीतिक्षमम् अर्थबन्धं सञ्चिन्त्य सुरसुन्दरीणां विच्छित्तिशेषैः वर्णैः कल्पलतांशुकेषु त्वच्चरितं लिखन्ति॥ ५॥

विच्छित्तीति। अमी=पुरो लक्ष्यमाणाः, दिवौकसः=देवाः, गीतिक्षमम्=गानयोग्यम् (गेयम्), अर्थबन्धं=पदावलीम्, सञ्चिन्त्य=चिन्तापूर्वकं विरचय्य, सुरसुन्दरीणां=देवाङ्गनानाम्, विच्छित्तिशेषैः—विच्छित्तिः=तिलकादिरलङ्कारः, तच्छेषैः=तदवशिष्टैः, वर्णैः=रक्तपीतादिवर्णकैः रञ्जनसाधनैः, कल्पलतांशुकेषु=कल्पतरुसमुद्भूतवसनेषु, त्वच्चरितम्=परोपकारादिरूपं तव चरित्रम्, लिखन्ति। अत्र उदात्तालङ्कारः दीपकालङ्कारश्च। उपजातिर्वृत्तम्॥ ५॥

भावार्थः—पुरो दृश्यमाना अमी देवाः गेयपदावलीं सञ्चिन्त्य देवाङ्गनाङ्गरागविशिष्टैः वर्णैः कल्पवृक्षसमुद्भूतवसनेषु परोपकारादिगुणसम्पन्नं त्वच्चरितं लिखन्ति (देवानामेवंविधा सदा शृङ्गाररसोपभोगयोग्यगीतादिसंरचना तेषां गानञ्च त्वदनुग्रहादेवेति भावः)॥ ५॥

राजा—मातले=देवराजसारथे! असुराणाम्=दैत्यानाम्, सम्प्रहारे=युद्धे विषये, उत्सुकेन=उत्कण्ठितेन, असुरसम्प्रहारोत्सुकेन, दिवं=स्वर्गम्, अधिरोहता=आरोहता, मया, अयं

ये देवता गाने योग्य पद बनाकर देवाङ्गनाओं के उपभोग से बचे हुए अङ्गराग के रङ्गों से कल्पवृक्ष द्वारा उत्पादित वस्त्रों पर आपका यश लिख रहे हैं॥ ५॥

राजा—मातलि! गत दिवस राक्षसों के साथ युद्ध करने की उत्कण्ठा के कारण स्वर्ग की ओर आते समय मैंने इस प्रदेश की ओर ध्यान नहीं दिया था। अतः (बताओ) इस समय हम वायु के किस मार्ग पर हैं।

(traversing a small distance) Long-lived one! this way behold the glory of your fame that is firmly established on the surface of the heaven.

With paints left over after the personal decorations of heavenly beauties, the inhabitant of heaven gods here are writing your exploit on vestments obtained from the desire-yielding trees, after having thought out a composition suitable for singing. (5)

The king—Mātalī! being eager to fight with the demons, I did not observe the way to heaven while ascending the sky yesterday. On which track of the wind are we?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्त्तयति चक्रविभक्तरश्मिः।
तस्य व्यपेतरजसः प्रवहस्य वायो-
र्मार्गो द्वितीयहरिविक्रमपूत एषः॥ ६॥

राजा—अतः खलु मे सबाह्यान्तःकरणोऽन्तरात्मा प्रसीदति। (रथाङ्गमवलोक्य) शङ्के मेघपदवीमवतीर्णाः स्मः।

प्रदेशः=एषः पुरःस्थितः क्षेत्रभागः (मार्गभागः), पूर्वेद्युः=पूर्वस्मिन्नहनि, न लक्षितः=न निरीक्षितः, तत्=तस्मात्, (कथय) मरुताम्=वायूनाम्, कतमस्मिन् पथि=कतमस्मिन् मार्गे, वर्त्तामहे=वर्त्तमाना स्मः (आवहादयः सप्तवायवस्तेषां मध्ये कतमस्मिन् वायोर्मार्गे सम्प्रति वयं वर्त्तमानाः स्म तत्कथय)।

मातलिः—अन्वयः—यः गगनप्रतिष्ठां त्रिस्रोतसं वहति तथा चक्रविभक्तरश्मिः ज्योतींषि वर्त्तयति, व्यपेतरजसः तस्य प्रवहस्य वायोः एषः द्वितीयहरिविक्रमपूतः मार्गः वर्त्तत इति शेषः॥ ६॥

त्रिस्रोतसमिति। यः=प्रवहो नाम वायुः, गगने=अन्तरिक्षे, प्रतिष्ठा=स्थितिः, यस्यास्तां गगनप्रतिष्ठाम्, त्रिस्रोतसं=गङ्गाम्, वहति=धारयति, तथा चक्रेण=स्वस्थितज्योतिषां मण्डलेन, विभक्ता=विभज्य विन्यस्ता, रश्मयः=किरणाः, यत्र सः चक्रविभक्तरश्मिः, सन्, प्रवहस्य वायुः, ज्योतींषि=ग्रहनक्षत्रादीनि, वर्त्तयति=धारयति चालयति वा, व्यपेतानि=भूवायोरुपरि स्थितत्वात् विगतानि, रजांसि=धूलयः, यस्मात् तस्य व्यपेतरजसः, तस्य=तादृशगुणोपेतस्य, प्रवहस्य= तन्नामकस्य वायोः, एषः=दृश्यमानः, द्वितीयेन हरेः=वामनस्य (विष्णोः), विक्रमेण=पादक्षेपेण, पूतः=पवित्रीकृतः, द्वितीयहरिविक्रमपूतः, मार्गः=पन्थाः, वर्त्तत इति शेषः। अत्र वसन्ततिलका वृत्तम्॥ ६॥

भावार्थः—यथा कश्चित् सारथिः प्रग्रहं धृत्वा स्वस्थं चालयति तथैव यः प्रवहो नाम वायुः गगने स्थितां मन्दाकिनीं धारयति उत चालयति व्यपेतरजसः तस्य प्रवहो नाम वायुः एषः विष्णोः पादक्षेपेण पवित्रीकृतः मार्गः वर्त्तते इति भावः॥ ६॥

राजा—अतः=उक्तगुणविशिष्टवायुमार्गवर्त्तनात्, खल्विति निश्चयेन, मे=मम दुष्यन्तस्य,

---

मातलि—जो प्रवह नामक वायु आकाशगङ्गा को तथा नक्षत्रमण्डल को धारण किये हुए हैं तथा जो वायु नक्षत्रमण्डल के ऊपर पृथक् भाव से किरणों को विन्यस्त किये हुए हैं, पार्थिव धूलि से रहित प्रवह नामक वायु का यह पथ है। यह पथ भगवान् वामन के द्वितीय चरण-निक्षेप से पावन हो चुका है॥ ६॥

राजा—इसीलिए भीतर और बाहर से मेरी अन्तरात्मा प्रसन्न हुई है। **(रथ के पहिये को देखकर)** मेरा विचार है कि अब हम मेघ-मार्ग पर उतर रहे हैं।

***Mātali*—**This is the path, sanctified by the second step of Hari, of the wind pravāha, which is free from dust (Rajas), which bears the triple streamed river (Ganges) located in the sky and which causes the luminaries to revolve with their rays (duly) distributed. (6)

***King*—**Hence indeed my inner self, together with the exter-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—आयुष्मन्! कथमवगम्यते?

राजा— **अयमगविवरेभ्यश्चातकैर्निष्पतद्भि-**
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः॥७॥

बाह्यैश्चक्षुरादिभिः=अन्तःकरणैः मनःप्रभृतिभिश्च सह वर्तत इति सबाह्यान्तःकरणः, अन्तरात्मा= जीवात्मा, प्रसीदति=प्रसन्नो भवति। (रथाङ्गम्=चक्रम्, अवलोक्य=दृष्ट्वा) शङ्के=तर्कयामि (मन्ये), मेघपदवीम्=प्रवहादधोवर्त्तिनमावहापरपर्य्यायं भूवायुम्, अवतीर्णाः=अवतरिताः (प्राप्ताः) स्म।

मातलिः—आयुष्मन्=प्रशस्तायुःशालिन्! केन=केन लक्षणेन, अवगम्यते=ज्ञायते, यत् मेघपदवीमवतीर्णाः स्म इति।

राजा—

अन्वयः—शीकरक्लिन्ननेमिः अयं ते रथः अगविवरेभ्यः निष्पतद्भिः चातकैः अचिर-भासां तेजसा अनुलिप्तैः हरिभिः वारिगर्भोदराणां घनानाम् उपरि गतम् (इति) पिशुनयति॥७॥

अयमिति। शीकरैः=जलबिन्दुभिः, क्लिन्नाः=आर्द्रीकृताः, नेमयः=चक्रप्रान्तभागाः, यस्य सः शीकरक्लिन्ननेमिः, अयम्, ते=तव, रथः=स्यन्दनः, अगविवरेभ्यः=शैलरन्ध्रेभ्यः, निष्पतद्भिः= निर्गच्छद्भिः, चातकैः=तन्नामकपक्षिविशेषैः, अचिरम्=अचिरस्थायिन्यः, भासः=दीप्तयः, यासां तासाम् अचिरभासाम्=विद्युताम्, तेजसा=किरणेन, अनुलिप्तैः=अनुरञ्जितैः, हरिभिः=वाजिभिश्च, वारीणि=जलानि, गर्भे=मध्ये, येषां तानि वारिगर्भाणि च, उदराणि=अभ्यन्तरावकाशाः, येषां तेषां वारिगर्भोदराणाम्, घनानाम्=मेघानाम्, उपरि=ऊर्ध्वभागे, गतं=गमनम्, (इति) पिशुनयति= सूचयति। अत्र समुच्चयः, पदार्थहेतुकं काव्यलिङ्गम् अनुमानश्चालङ्काराः। मालिनी वृत्तम्॥७॥

मातलि—आयुष्मन्! आपने यह कैसे जाना?

राजा—क्योंकि इस रथ के पहिये का प्रान्तभाग जलकणों से कुछ-कुछ गीला हो गया है। इस स्थिति में इस रथ के पर्वतीय छिद्रों से निकलते हुए चातकों तथा विद्युत् के तेज से रङ्गे हुए घोड़ों के द्वारा यही विदित होता है कि हम जलपूर्ण मेघों के ऊपर चल रहे हैं (मेघपथ पर उतर गये हैं)॥७॥

---

nal and internal organs, feels a pleasant tranquility. *(Looking at a wheel of the chariot)* we have descended to the region of the clouds.

Mātali—How is this known?

The king—Here your chariot, with its rims bedewed with sprays, indicates our passage over clouds, whose bellies are filled with water, by the chātakas flying forth through the interstics of the spoks of (coming out from the holes (nests) of the mountain) by the horses glistening with the glow of lightning. (I can guess that we have descended over the cloudy-way) (7)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—अथ किम्। क्षणाच्चायुष्मान् स्वाधिकारभूमौ वर्तिष्यते।

राजा—(अधोऽवलोक्य) मातले! वेगादवतरणादाश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः। तथाहि—

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी,
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः।
सन्धानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः,
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते॥ ८॥

भावार्थः—नेमेः क्लिन्नत्वात् हरीणां विद्युत्तेजसानुलिप्तत्वात् चातकानां शैलरन्ध्रेभ्यः जलयानायागमनाच्च अनुमीयते यद् वयं मेघपदवीमवतीर्णाः स्मः॥ ७॥

मातलिः—अथ किम्=इत्येकमव्ययमङ्गीकारार्थकम्, क्षणात् च=स्वल्पेनैव कालेन, क्षणेनैवेत्यर्थः, आयुष्मान्=भवान्, स्वाधिकारभूमौ=स्वराज्यभूतमर्त्यलोके, वर्त्तिष्यते=उपस्थास्यति।

राजा—(अधः=नीचैः, अवलोक्य=दृष्ट्वा) मातले! वेगात्=शीघ्रगत्या, अवतरणात्=अधोऽवनमनात्, आश्चर्यं दर्शनं यस्य सः आश्चर्यदर्शनः=विस्मयकररूपः, मनुष्यलोकः= मर्त्यलोकः, संलक्ष्यते=सन्दृश्यते। तथाहि—

अन्वयः—मेदिनी उन्मज्जतां शैलानां शिखरात् अवरोहतीव पादपाः स्कन्धोदयात् पर्णाभ्यन्तरलीनतां विजहाति, आपगाः तनुभागनष्टसलिलव्यक्त्या सन्धानं व्रजन्ति, तथा उत्क्षिपता केनापि भुवनं मत्पांर्श्वम् आनीयते इव॥ ८॥

शैलानामिति। मेदिनी=क्षितिः, उन्मज्जताम्=उन्नमताम्, शैलानाम्=पर्वतानाम्, शिखरात्=शृङ्गात्, अवरोहतीव=अवतरतीव, पादपाः=वृक्षाः, स्कन्धानां=मूलाच्छाखावधिदेशानाम्, उदयात्=स्फुटं प्रकाशात्, स्कन्धोदयात्, पर्णानां=पत्राणाम्, अभ्यन्तरेषु=मध्येषु, लीनताम्=अन्तर्हितत्व-

---

मातलि—और क्या! क्षणभर में ही आप अपनी अधिकार भूमि (राज्य) में पहुँच जायेंगे।

राजा—(नीचे देखकर) मातलि! वेग से उतरने के कारण यह मानवलोक आश्चर्यजनक दिखायी पड़ रहा है। जैसे कि—

ऐसा प्रतीत होता है कि मानो पर्वत ऊपर उठ रहे हों और उनकी चोटियों से पृथ्वी नीचे उतर रही हो। शाखाओं के स्पष्ट दिखायी देने से वृक्ष ऐसे प्रतीत होते हैं मानों पत्तों के आवरण से बाहर आ रहे हों। दूर से क्षीण धारा के कारण जिनका जल दिखायी नहीं पड़ रहा

***Mātali*—Of course! Within a moment the long-lived one! will be on the land under his own control.**

The king—(Looking below) Mātalī! the world of men is observed to be of wonderful appearance owing to our rapid descent. For—

The earth as though descends from the peack of the mountains that are emerging; owing to the rise (i.e. coming into view) of their trunks, the trees give up the state of being enveloped in their foliage; rivers, whose water had disappeared through

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—आयुष्मन्! साधु दृष्टम्। (सबहुमानमालोक्य) अहो! उदाररमणीया पृथिवी।

राजा—मातले! कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यन्दो सान्ध्य इव मेघः सानुमानालोक्यते।

मापद्यताम्, पर्णाभ्यन्तरलीनतां, विजहाति=विमुञ्चन्तीव, आपगाः=नद्यः, तनुभागेषु=अविस्तृतभागेषु, नष्टानां=दूरतयाऽनुपलब्धानां, सलिलानां=जलानां, व्यक्त्या=क्रमशो नैकट्यात् प्रकाशेन, सन्धानम्=संयोगमविच्छिन्नत्वम्, इति यावत्, व्रजन्ति=प्राप्नुवन्तीव, तथा उत्क्षिप्ता=भुवनमेवोर्ध्वनिक्षिप्ता, केनापि=कुतुकिना जनेन, भुवनम्=अयं भूलोकः, मत्पार्श्वं=मत्समीपम्, आनीयते=प्राप्यते, इवेति, त्वं पश्य=अवलोकय। अत्र क्रियोत्प्रेक्षा, काव्यलिङ्गम्, स्वभावोक्तिश्चालङ्काराः। शार्दूलविक्रीडितं वृत्तम्॥ ८॥

भावार्थः—पूर्वं किञ्चिद् दूरावस्थिततत्वेन भुवनस्याचलत्वरूपेण मदीयप्रतीतिरासीत्, सम्प्रति तु वेगेभ्य अवतरणात् मम निकटवर्त्तितया केनापि कुतुकिना भुवनमुत्क्षिप्तमिवालक्ष्यते इति भावः॥ ८॥

मातलिः—आयुष्मन्=प्रशस्त आयुःशालिन्! साधु दृष्टम्=सम्यगेव त्वयावलोकितम्। (सबहुमानम्=सादरम्, आलोक्य=दृष्ट्वा) अहो! इत्यादरे प्रशंसायां वा, उदाररमणीया=अतिमनोहरा, पृथिवी=क्षितिः।

राजा—मातले! अयम्=पुरतो दृश्यमानः, कतमः, पूर्वापरयोः=पूर्वपश्चिमयोः सागरयोर्मध्ये, अवगाढः=प्रविष्टः, पूर्वापरसमुद्रावगाढः, कनकरसं=सुवर्णद्रवं, निष्यन्दयितुं=स्रावयितुं, शीलमस्यास्ति इति कनकरसनिष्यन्दीस्वर्णमयधातुरसस्रावी, सन्ध्याया अयम् इति सान्ध्यः=सन्ध्याकालीनः, मेघ इव=वारिद इव, सानुमान्=तन्नामकः पर्वतः, आलोक्यते=दृश्यते।

था वे नदियाँ अब आपस में मिली हुई-सी दिखायी पड़ रही हैं। यह सब देखकर ऐसा अनुमान होता है मानो कोई इस मानव लोक को ऊपर उछाल रहा हो और इस प्रकार इसे मेरे पास ला रहा हो॥ ८॥

मातलि—आयुष्मान्! आपने ठीक देखा। (**विशेष आदर के साथ देखकर**) अहो! पृथ्वी अतीव रमणीय दिखायी पड़ रही है।

राजा—मातलि! पूर्व और पश्चिम समुद्र में प्रविष्ट, सुवर्णरस को प्रवाहित करने वाला सन्ध्याकालीन मेघ के समान प्रतीत होने वाला यह कौन-सा पर्वत दिखायी दे रहा है?

---

thinness, acquire manifestation through expension; behold, the world is as though being brought near me by some one flinging (throwing) it up. (8)

Mātali—Long-lived one! well observed (by you). *(looking with great respect)* Oh! how grand and charming is the earth!

The king—Mātali! what mountain is yonder (within view) seen has plunged in the eastern and the western ocean and that, possessing a stream of liquid gold, is like a bar of evening cloud?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—आयुष्मन्! एष खलु हेमकूटो नाम किंपुरुषपर्वतः परं तपस्विनां क्षेत्रम्। पश्य—

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽस्मिन् सपत्नीकस्तपस्यति॥ ९॥

राजा—(सादरम्) तेन ह्यनतिक्रमणीयानि श्रेयांसि। प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि।

मातलिः—आयुष्मन्! एषः=भवन्निर्दिष्टः, खल्विति निश्चयेन, हेम्नः=सुवर्णस्य, कूटानि=शिखराणि, यस्य सः हेमकूटः, नाम=नामकः, किम्पुरुषपर्वतः=किम्पुरुषवर्षपर्वतः, तपस्विनां, परम्=उत्कृष्टम्, क्षेत्रम्=स्थानम्। पश्य=अवलोकय—

अन्वयः—स्वायम्भुवात् मरीचेः यः प्रजापतिः प्रबभूव, सुरासुरगुरुः सपत्नीकः सः अस्मिन् तपस्यति॥ ९॥

स्वायम्भुवादिति। स्वयम्=आत्मना, भवतीति स्वयम्भूः=ब्रह्मा, तस्यापत्यमिति स्वायम्भुवस्तस्मात्=ब्रह्ममानसपुत्रात्, मरीचेः=तदाख्यात् देवर्षेः, यः प्रजापतिः=प्रजास्रष्टा कश्यपः, प्रबभूव=प्रथमं यज्ञे, सुराणामसुराणाञ्च गुरुः=पिता, सुरासुरगुरुः, सपत्नीकः=पत्नीसहितः, सः=कश्यपः, अस्मिन्=पर्वते, तपस्यति=तपस्यामाचरति। अत्र पथ्यावक्त्रं वृत्तम्॥ ९॥

भावार्थः—यतः सुरासुरगुरुः कश्यपः सपत्नीकः अस्मिन्नेव पर्वते तपस्यामाचरति अतः तपस्विनां परं क्षेत्रमेतत् इति जानीहि॥ ९॥

राजा—(स्वगतम्=आत्मगतम्) अनतिक्रमणीयानि=अनवहेलनीयानि, हि इति निश्चयेन, श्रेयांसि=मङ्गलानि। भगवन्तम्=कश्यपम् (माहात्म्यशालिनम्), प्रगतं दक्षिणमिति प्रदक्षिणम्, प्रदक्षिणीकृत्य=प्रदक्षिणीकृत्वा, दक्षिणावर्त्तेन परिवेश्य, गन्तुम्=स्वराज्ये गन्तुम्, इच्छामि=कामये।

मातलि—आयुष्मन्! तपस्वियों के लिए उत्कृष्ट स्थान यह हेमकूट नामक पर्वत दीख रहा है। देखिए—

ब्रह्मा के पुत्र मरीचि से जिनका जन्म हुआ है, जो देव-दानव दोनों के जनक हैं वही प्रजापति कश्यप अपनी पत्नी के साथ इस पर्वत पर तपस्या कर रहे हैं।

राजा—(मन में) माङ्गलिक (स्थानों, व्यक्तियों) आदि को इस प्रकार छोड़कर (बिना उन्हें समुचित आदर दिये) जाना उचित नहीं। मैं चाहता हूँ कि प्रभावशाली भगवान् कश्यप का दर्शन (प्रदक्षिणा) करके ही मैं जाना चाहता हूँ।

***Mātali*—**Long-lived one! this is indeed mountain of the kimpuruṣās, Hemakūta named, region of the perfact fulfilment of penance. Behold—

That Prajāpati, who sprang from Marīci, the son of the self born (Bramhā) and who himself is the father of gods and demons, is here practicing penance wtih his wife. (9)

***The king*—**Then surely blessings are not to be passed by. I desire to proceed after having circumambulated the revered sage.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—आयुष्मन्! प्रथमः कल्पः। (अवतरणं नाटयन्) एतावपवतीर्णौ स्वः।

राजा—(सस्मितम्) मातले!

उपोढशब्दा न रथाङ्गनेमयः प्रवर्त्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतया निरुद्धतिस्तवावतीर्णोऽपि न लक्ष्यते रथः॥ १०॥

मातलिः—एतावानेव शतमन्योरायुष्मतश्च रथस्य विशेषः।

मातलिः—आयुष्मन्! प्रथमः=मुख्यः, कल्पः=पक्षः। (अवतरणं=हेमकूटपर्वते रथस्यावतरणं, नाटयन्=अभिनयन्) एतौ स्वः=आवाम् अवतीर्णौ।

राजा—(सस्मितम्=सेषद्धासम्) मातले!

अन्वयः—अभूतलस्पर्शतया रथाङ्गनेमयः उपोढशब्दाः (न भवन्ति), च रजः प्रवर्त्तमानं न दृश्यते, तथा निरुद्धतिः तव रथः अवतीर्णोऽपि न लक्ष्यते॥ १०॥

उपोढेति। नास्ति भूतले=पृथिवीपृष्ठे स्पर्शो यस्य तया अभूतलस्पर्शतया=व्योमवर्त्तितया, रथाङ्गानाम्=चक्राणां, नेमयः=प्रान्तभागाः, रथाङ्गनेमयः, उपोढाः=धृताः, शब्दाः याभिस्तास्तादृश्यो न भवन्तीति शेषः, उपोढशब्दाः=निःशब्दा भवन्तीति भावः। च=एवं, रजः=धूलिश्च, प्रवर्त्तमानम्=नेमित उत्पद्यमानम्, न दृश्यते=न दृष्टिपथमायाति। तथा—निर्=नास्ति, उद्धतिः=शनैः शनैः भूसंयोगादुच्चनीचस्पर्शजनितमौद्धत्यं, यस्य सः निरुद्धतिः, तव, रथः=स्यन्दनः, अवतीर्णोऽपि=पर्वतीयक्षेत्रे कृतावतरणोऽपि, न लक्ष्यते=अवतीर्णत्वेन नावबुध्यते। अत्र काव्यलिङ्गमलङ्कारः। वंशस्थविलं वृत्तम्॥ १०॥

भावार्थः—नेमीनां शब्दाभावाद्रजसामदर्शनादुद्धतेरभावात् अभूतलस्पर्शतया च तव रथः भूतले कृतावतरणोऽपि नावबुध्यते॥ १०॥

मातलि—आयुष्मन्! वस्तुतः यही प्रथम करणीय कर्त्तव्य है। **(उतरने का अभिनय करते हुए)** लीजिए हम उतर आये।

राजा—(मुस्कराकर) मातलि!

भूतल का स्पर्श न करने के कारण, पहियों से किसी प्रकार का शब्द न निकलने के कारण, धूल के दिखायी न देने के कारण तथा ऊपर-नीचे न होने के कारण आपका रथ नीचे उतर आया है, यह पता ही नहीं चलता॥ १०॥

मातलि—आपके और देवराज के रथ में इतना ही तो (अन्तर है)।

***Mātali*—**Long-lived one! an excellent idea indeed. *(They gesticulate descent)* See, we have descented.

The king*—(With a smile)*

The rims of the wheels have produced no sound; no dust too is seen rising, your chariot which is free from jolting owing to its not touching the surface of the earth, is not, though descended, noticed (to be so). (10)

***Mātali*—**This much only is the difference between the chariot of Indra and of the long-lived one.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—मातले! कतमस्मिन् प्रदेशे मारीचाश्रमः ?

मातलिः—(हस्तेन दर्शयन्) पश्य—

वल्मीकार्द्धनिमग्नमूर्त्तिरुरगत्वग्ब्रह्मसूत्रान्तरः
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीडितः।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः॥ ११॥

मातलिः—एतावानेव=इयन्मात्रमेव, शतमन्योः=शतक्रतोः इन्द्रस्य, आयुष्मतः=भवतश्च, रथस्य, विशेषः=अन्यरथेभ्यो वैलक्षण्यम्।

राजा—मातले! कतमस्मिन् प्रदेशे=हेमकूटपर्वतस्य कस्मिन् भागे, मारीचस्य=कश्यपस्य, आश्रमः, अस्तीति शेषः।

मातलिः—(हस्तेन=करेण, दर्शयन्=आश्रमं निर्दिशन्) पश्य—

अन्वयः—वल्मीकार्द्धनिमग्नमूर्तिः तथा उरगत्वग्ब्रह्मसूत्रान्तरः जीर्णलताप्रतानवलयेन कण्ठे अत्यर्थसम्पीडितः। एवं अंसव्यापि शकुन्तनीडनिचितं जटामण्डलं बिभ्रत् (असौ मुनिः यत्र अचलः स्थाणुरिव अभ्यर्कबिम्बं स्थितः स मारीचाश्रम इति)॥ ११॥

वाल्मीकेति। वल्मीके=उयिकोत्थापितमृत्पुञ्जमध्ये, अर्द्धनिमग्ना=अर्द्धावगाढा, मूर्तिः=शरीरं, यस्य सः वल्मीकार्द्धनिमग्नमूर्तिः, तथा, उरगत्वक्=सर्पनिर्मोकः, ब्रह्मसूत्रान्तरम्=अपरं यज्ञोपवीतं, यस्य सः उरगत्वग्ब्रह्मसूत्रान्तरः, जीर्णानां=परिणतानां, लतानां=वल्लीनां, प्रतानः=कुटिलतन्तुः, स एव वलयं=वर्त्तुलं, वेष्टनम्, तेन जीर्णलताप्रतानवलयेन, कण्ठे=गलदेशे, अत्यर्थम्=अतिशयेन, सम्पीडितः=क्लेशं प्रापितः, अत्यर्थसम्पीडितः, एवं अंसव्यापि=स्कन्धपर्य्यन्तव्यापकम्, शकुन्तानां=पक्षीणां, नीडैः=कुलायैः, निचितम्=व्याप्तम्, शकुन्तनीडनीचितम्, जटामण्डलम्=जटाजूटम्, बिभ्रत्=दधानः, असौ=दृश्यमानः, मुनिः=कश्चिन्महातपा महर्षिः, यत्र=यस्मिन् देशे, अचलः=निस्पन्दः, स्थाणुः=पत्रशाखादिवर्जितवृक्षकाण्डः इव, अभ्यर्कबिम्बम्=सूर्यमण्डलम्, अभिलक्ष्यीकृत्य, स्थितः=तिष्ठति। स एव मारीचाश्रमः=मरीचेरपत्यं पुमान् मारीचः=

राजा—मातलि! महर्षि कश्यप का आश्रम कहाँ है?

मातलि—(हाथ से दिखाते हुए) देखिए—

जिनका आधा शरीर वल्मीक (बाँबी) में छिपा है, जिनके कन्धे पर साँप की काँचुली के नीचे यज्ञोपवीत शोभित है, जिनका गला पुरानी लताओं के तन्तुओं से जकड़ा हुआ है, जिनकी जटाओं में पक्षियों ने अपने रहने के घोंसले बना लिये हैं, जो जटाजूट धारण

The king—Mātali! In which region is the hermitage of Mārīca?

Mātali—(Indicating with hand)—

Where motionless like the dry trunk of a tree, stands the sage, facing the sun's orb with his body half buried in an ant-hill, with his chest having a serpent's slough closely adhering to it, with his neck excessively pressed by a coil of the tendrils of old creepers

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(विलोक्य) नमोऽस्मै कष्टतपसे।

मातलिः—(संयतप्रग्रहं रथं कृत्वा) एतावदिति परिवर्द्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।

राजा—अहो! स्वर्गादिदमधिकतरं निर्वृत्तिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि।

कश्यपस्तस्येति भावः। अत्र परिकरालङ्कारः तथा श्लेषघटितश्रौतोपमा च। शार्दूलविक्रीडितं नाम वृत्तम्॥ ११॥

भावार्थः—अनेककालं व्याप्यैकनिष्ठतया तपश्चरणादुर्यिकाभिर्मृदमुत्तोल्य शरीरार्द्धं यावद्य-स्यावृतं तथा च निश्चलतयावस्थानात् वल्मीकबुद्ध्या केनचित् सर्पेण यस्य स्कन्धदेशे यज्ञोपवीतमिव निजनिर्म्मोकः परिधापितः, तथा च यस्य गलप्रदेशं समुत्पद्यमाना लता दीर्घकालावस्थित्या परिणतिं गता स्वकीयतन्तुभिर्निगडैरिव सम्बध्योत्पीडितं तथा च यस्य निश्चलावस्थानेन जटासु पक्षिणोऽप्यावासं कृत्वा स्थिताः, सः असौ दृश्यमानः मुनिः यस्मिन् क्षेत्रे स्थाणुरिव सूर्यमण्डलम् अभिलक्ष्यीकृत्य तिष्ठति स एव मारीचाश्रम इति ज्ञेयम्॥ ११॥

राजा—(विलोक्य=दृष्ट्वा) कष्टं=कृच्छ्रं, तपो यस्य तस्मै कष्टतपसे, अस्मै=मुनये, नमः।

मातलिः—(रथं=स्यन्दनं, संयतः=कराभ्यां धृतः, प्रग्रहः=रज्जुः, यस्य तं संयतप्रग्रहम्, कृत्वा=विधाय) अदित्या=कश्यपपत्न्या, परिवर्द्धितः=जलसेकादिना वृद्धिं प्रापितः, मन्दारवृक्षः= तन्नामकदेवतरुः, यस्मिन् तम् अदितिपरिवर्द्धितमन्दारवृक्षम्, प्रजापतेः=कश्यपप्रजापतेः, आश्रमं= तपोवनम्, स्वः=आवाम्, प्रविष्टौ।

राजा—अहो इति प्रशंसायाम्, इदम्=दृश्यमानम्, निर्वृत्तेः=सुखस्य, स्थानं निर्वृत्ति-स्थानम्, स्वर्गात्=अमरलोकात् अपि, अधिकतरम्=उत्कृष्टतरम्, अमृतस्य=सुधायाः, ह्रदं= जलाशयमिव, अमृतह्रदमिव, अवगाढोऽस्मि=अभ्यन्तरे प्रविष्टोऽस्मि (निमज्जितोऽस्मि)।

किये हुए हैं, ऐसे जो ये मुनि वृक्ष के ठूँठ की भाँति सूर्य के बिम्ब की ओर देखते हुए अचल भाव से जहाँ विराजमान हैं वही मारीचाश्रम है॥ ११॥

राजा—(**देखकर**) इस कष्टकारी तप को करने वाले मुनि को प्रणाम है।

मातलि—(**रथ की बागडोर खींचकर**) यह हम प्रजापति कश्यप के आश्रम में प्रविष्ट हो गये हैं, जहाँ के मन्दार वृक्ष को अदिति ने अपने हाथों सींचकर बड़ा किया है।

राजा—अहो! यह स्थान स्वर्ग से भी अधिक शान्तिदायक है। (यहाँ पहुँचकर) मानो मैं अमतृसर में निमज्जित हो गया हूँ।

---

and bearing a mass of matted hair that envelops his shoulders and is thickly filled with nests of birds. (11)

The king—*(Observing)* A bow to you whose penance is so severe.

Mātali—*(Drawing in the reins of the chariot)* Here we have entered the hermitage of the Prajāpati, the Mandāra trees in which are grown up by Aditi herself.

The king—Oh! this place of happiness is indeed superior to the heaven. I am as though immersed in a pool of nectar.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—(रथं स्थापयित्वा) अवतरत्वायुष्मान्।

राजा—(अवतीर्य) भवान् किमिदानीम्?

मातलिः—समययन्त्रित एवायमास्ते रथः, तद्वयमप्यवतरामः। (तथा कृत्वा) इत इत आयुर्ष्मन्! दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।

राजा—ननु विस्मयादुभयमप्यवलोकयामि—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने,
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो,
यद्वाञ्छन्ति तपोऽभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी॥ १२॥

मातलिः—(रथं=स्यन्दनं, स्थापयित्वा=स्थिरीकृत्य) आयुष्मान्=प्रशस्तायुःशालिन्, (रथाद्) अवतरतु=अवरोहतु।

राजा—(अवतीर्य=अवरुह्य) भवान् किमिदानीम्=किमिदानीमवतरेदिति वाक्यशेषः। देवराजसारथित्वात् सम्मानरक्षार्थमस्पष्टतया भवदवतरणमपेक्षे इत्याशयः।

मातलिः—अयं रथः, समयेन=मया निर्धारितकालेन, सङ्केतविशेषेण नियमेन वा, यन्त्रितः=अवरोधितः, समययन्त्रित एव, आस्ते=तिष्ठति, मदीय इच्छां विना नैकपदमपि चलितुं शक्नुयादिति भावः। तद्=तस्मात्, वयमप्यवतरामः=अहमपि अवरोहामः। (तथा कृत्वा= रथादवतरणं कृत्वा) इत इत आयुष्मान्=अनेनानेन मार्गेण आगच्छतु आयुष्मान्, अत्रभवताम्= पूजनीयानाम्, ऋषीणां=तापसानाम्, तपोवनभूमयः=तपःसाधनवनभूमयः, दृश्यन्ताम्= अवलोक्यन्ताम्।

राजा—नन्विति सम्बोधने, विस्मयात्=विस्मयमवलम्ब्य, उभयं=तपः तपोवनभूमिश्चैतद्-द्वयमपि, अवलोकयामि—

मातलि—(**रथ रोककर**) आयुष्मान्! (रथ से) उतरें।

राजा—(**उतरकर**) तो क्या अब आप भी ····· ?

मातलि—यह रथ सङ्केत मात्र से नियन्त्रित है, अतः मैं भी उतरूँगा। (**उतरकर**) इस मार्ग से पधारें आयुष्मान् और पूज्य तपस्वियों की तपोवनभूमि को देखें।

राजा—मैं विस्मय के साथ दोनों बातें (तप और तपस्यास्थान) देख रहा हूँ।

Mātali—(Having stopped the chariot) Let the long-lived one alight.

The king—(Alighting) How will you (got down) now.....?

Mātali—The chariot has been controlled by time or indication we too shall get down. *(Doing the same)* This way long-lived one! Let the regions of the penance-grove of these revered sages be observed.

The king—Why! with wonder I behold. (The both-the hermitage and the hermit)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—उत्सर्पिणी खलु महतां प्रार्थना। (परिक्रम्य आकाशे) वृद्धसाकल्य! किंव्यापारः सम्प्रति भगवान् मारीचः ? (आकर्ण्य) किं ब्रवीषि—दाक्षायण्या पतिव्रतापुण्य-

---

अन्वयः—सत्कल्पवृक्षे वने अनिलेन प्राणानां वृत्तिः उचिता, काञ्चनपद्मरेणुकपिशे तोये पुण्याभिषेकक्रिया (उचिता), तथा च रत्नशिलागृहेषु ध्यानं विबुधस्त्रीसन्निधौ संयमः, एवं च अन्यमुनयः तपोभिः यत् वाञ्छन्ति अमी तस्मिन् तपस्यन्ति॥ १२॥

प्राणानामिति। सन्तः=विद्यमानाः, कल्पवृक्षाः=अभीष्टफलदायिनः तरुविशेषाः, यस्मिन् तत् सत्कल्पवृक्षे, वने=तपोवने, अनिलेन=वायुना (केवलवायुभक्षणेन न तु कल्पवृक्षप्रदत्तभक्ष्य-वस्तुना), प्राणानां वृत्तिः=स्थितिः, उचिता=अभ्यस्ता। (इच्छापूरककल्पवृक्षसम्पन्नवनेऽपि वायु-भक्षणेनैव जीवनधारणमतीव विस्मयकरमिति भावः)। काञ्चनपद्मानाम्=सुवर्णकमलानाम्, रेणुभिः=परागैः, कपिशे=पिङ्गलवर्णे, काञ्चनपद्मरेणुकपिशे, तोये=जले, पुण्या=पावनी, अभिषेक-क्रिया=पुण्याभिषेकक्रिया, नियमस्नानकर्म्मसम्पादनं न तु विहारप्रवृत्तिः (तथा च काञ्चनपद्म-रेणुकपिशे जले सुन्दरीभिः सह विहारमकृत्वा नियमस्नानसम्पादनमतीव विस्मयापादकम्), रत्नशिला=रत्नविकारा उपलाः, तासां गृहेषु रत्नशिलागृहेषु=रत्ननिर्मितभवनेषु, ध्यानम्=आत्म-प्रत्ययैकतानता, न तु सुन्दरीभिः सहैकत्र शयनम् (इदमपि अतीव विस्मयजनकम्), तथा विबुधस्त्रीणां=देवाङ्गनानाम् (अप्सरसां), सन्निधौ=समीपे, संयमः=इन्द्रियनिग्रहः (देवाङ्गनाभिः सह सम्भोगमकृत्वा तासां सन्निधाविन्द्रियवशीकरणमतीव विस्मयजनकमिति भावः), एवञ्च अन्यमुनयः=विश्वामित्रादयः, तपोभिः=तपश्चरणैः, यत्=स्थानं वस्तु वा, वाञ्छन्ति=काङ्क्षन्ति, अमी=दृश्यमानाः मुनयः, तस्मिन्=स्थाने, तपस्यन्ति=तपस्यां कुर्वन्ति। अत्र विशेषोक्तिः, वाक्यार्थहेतुकं काव्यलिङ्गं व्यतिरेकश्चालङ्काराः। शार्दूलविक्रीडितं वृत्तम्॥ १२॥

भावार्थः—सत्कल्पवृक्षे अस्मिन् तपोवने केवलवायुभक्षणेनैव जीवनधारणं काञ्चनपद्म-रेणुकपिशे सुरभिते च जले दैनन्दिनीयपूजनादिसम्पादनार्थं स्नानमात्रसम्पादनम्, रत्नगृहेषु आत्मप्रत्ययैकतानता तथा देवाङ्गनासमीपे इन्द्रियवशीकरणमतीव विस्मयजनकम्। एवञ्च अन्यमुनयः तपोभिर्यद्वाञ्छन्ति तस्मिन् स्वर्गादपि महत्तरे रमणीयस्थाने अमी तपस्यन्तीत्यहो।

अभीष्ट फलदायक कल्पवृक्ष युक्त वन में मात्र वायु पीकर प्राण धारण करना, स्वर्णकमलों के पराग से पीताभ जल में मात्र स्नान करना, रत्नशिला-निर्मित आगारों में केवल आत्मतत्त्व का चिन्तन करते हुए ध्यान लगाना, देवाङ्गनाओं के निकट रहकर भी इन्द्रियनिग्रह करना तथा अन्य मुनि तपस्या द्वारा (जो स्थान या वस्तु) चाहते हैं ऐसे स्वर्ग से भी श्रेष्ठ स्थान पर रहकर तपस्या करना (इनकी श्रेष्ठता का परिचायक है)॥ १२॥

In a penance-grove, where there are desire-yielding trees, the necessary maintenance of life (is secured) with air, in water which become tawny (brownish, yellow) with the pollen of gold lotuses (is done) the act of ablution for religious practices, in the houses made of the rocks of jewells meditation is being practiced and restraint in the company of celestial damsels, these (asatics) perform penance in the mids of that which other sages aspire after by means of austerity. (12)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मधिकृत्य पृष्टस्तदस्यै महर्षिपत्नीगणसहितायै कथयतीति। तत् प्रतिपाल्यावसरः खलु प्रस्तावः। (राजानमवलोक्य) अस्यामशोकच्छायायां तावदास्तामायुष्मान्, यावत्त्वामहमिन्द्र-गुरवे निवेदयामि।

राजा—यथा भवान् मन्यते। (इति स्थितः)

(मातलिर्निष्क्रान्तः)

मातलिः—उत्=ऊर्ध्वम्, सर्पति=गच्छति, इति या सा उत्सर्पिणी=क्रमिकोर्ध्वगामिनी, खल्विति निश्चयेन, महतां=मनस्विनाम्, प्रार्थना=आशंसा (महान्तः खलु उत्तरोत्तरमुन्नतिमेव कांक्षन्ति), (परिक्रम्य=कश्यपसमीपगमनाय चंक्रमणं विधाय, आकाशे=शून्ये) वृद्ध साकल्य! (कस्यचित् कश्यपशिष्यस्य सम्बोधनम्, किं व्यापारः=किमाचारः, किं करोतीति भावः, भगवान्, मरीचेरपत्यं मारीचः=कश्यपः ? (आकर्ण्य=श्रवणाभिनयमभिनीय) किं ब्रवीषि ? दक्षस्यापत्यं स्त्री दाक्षायणी, तया दाक्षायण्या=अदित्या, पतिव्रतायाः=पातिव्रत्यसम्पन्नायाः स्त्रियाः, पुण्यम्= धर्म्मम्, पतिव्रतापुण्यम्, अधिकृत्य=आश्रित्य, पृष्टः=कृतप्रश्नः, तद=धर्म्मम्, अस्यै=दाक्षायण्यै, महर्षिपत्नी-गणसहितायै, कथयति=श्रावयति इति। तत्=तस्मात्, प्रतिपाल्यः=प्रतीक्ष्यः, अवसरो यस्य प्रति-पाल्यावसरः=अपेक्षणीयसमयः, खलु प्रस्तावः, विषयान्तरप्रसङ्गः (तत्कथनपरिसमाप्तौ सत्यां विषयान्तरप्रसङ्गः आरम्भणीय इति भावः)। (राजानम्=दुष्यन्तम्, अवलोक्य=दृष्ट्वा) अस्याम्=सम्मुखस्थ-अशोकच्छायायाम्, अशोकवृक्षतलस्थितानातपभूभागे, आयुष्मान्=भवान्, तावत्=तावत्कालपर्यन्तम्, आस्यताम्=उपविशतु, यावत्, अहम्=मातलिः, त्वाम्=दुष्यन्तम्, इन्द्रगुरवे=कश्यपाय, निवेदयामि=सूचयामि।

मातलि—महात्माओं की प्रार्थना क्रमशः ऊर्ध्वगामिनी हुआ करती है। **(कुछ कदम चलकर, आकाश में)** वृद्ध साकल्य! इस समय भगवान् कश्यप क्या कर रहे हैं? **(सुनकर)** क्या कहा? दाक्षायणी ने पतिव्रताधर्म के सम्बन्ध में प्रश्न किया था उसी के सम्बन्ध में अनेकानेक महर्षि-पत्नियों के साथ बैठी हुई दाक्षायणी को उस (पतिव्रता धर्म) के सम्बन्ध में बता रहे हैं। अतएव कोई दूसरा प्रस्ताव लाने के लिए कुछ समय तक प्रतीक्षा करनी होगी। **(राजा की ओर देखकर)** आप थोड़ी देर इस अशोकवृक्ष की छाया में विश्राम करें तब तक मैं इन्द्रगुरु प्रजापति कश्यप को आपके आगमन की सूचना दे आऊँ।

Mātali—High-soaring indeed is the prayer of the great. *(Walking round, in the air)* Oh, Vridha Sakalya! what is his holiness Mārīca doing? *(Hearing)* What do you say? That being questioned by Dākṣāyaṇī respecting the duties of devoted wives, he is expounding them to her in company with the wives of the great sages. So, we have to wait till we get a proper chance to inform the sage for our arrival. *(Looking towards the king)* Let the long- lived one sit at the shadow (at the foot) of this Aśoka tree so long as I remain on the look out for an opportunity to announce you to the father of Indra.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(निमित्तं सूचयित्वा)

मनोरथाय नाशंसे किं बाहो! स्पन्दसे मुधा।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्त्तते॥ १३॥

(नेपथ्ये) मा क्खु चवलदं करेहि, जहिं तहिं ज्जेव अत्तणो पेइदिं दंसेसि। **[मा खलु चपलतां कुरु, यस्मिन् तस्मिन्नेव आत्मनः प्रकृतिं दर्शयसि।]**

राजा—यथा भवान् मन्यते=भवतो यदभिमतं तत् करोतु। (इति स्थितः=एवमुक्त्वा अशोकच्छायामाश्रित्य तिष्ठति)

(मातलिः=देवराजसारथिः, निष्क्रान्तः=निर्गतः)

राजा—(निमित्तं=दक्षिणबाहुस्पन्दनरूपं शुभलक्षणम्, सूचयित्वा=रूपयित्वा)

अन्वयः—हे बाहो! मनोरथाय न आशंसे तस्मात् किं मुधा स्पन्दसे। हि पूर्वावधीरितं श्रेयः दुःखं सत् परिवर्तते॥ १३॥

मनोरथायेति। हे बाहो!=दक्षिणभुज! मनोरथाय=मनोरथविषयीभूताय (शकुन्तला-समागमाय), तस्मात् किं=कथम्, मुधा=मृथा, स्पन्दसे=स्फुरसि। (मनोरथविषयीभूतस्य प्राप्त्य-सम्भवत्वात् ते स्फुरणं निरर्थकम्), हि=तथाहि, पूर्वावधीरितम्=प्रथमं तिरस्कृतम्, श्रेयः= कल्याणम्, दुःखं सत्, परिवर्त्तते=व्यावर्त्तते, दुःखरूपेण परिणमति। अत्र पथ्यावक्त्रं वृत्तम्॥ १३॥

भावार्थः—हे दक्षिणभुज! अहं मनोरथविषयीभूताय शकुन्तलासमागमाय न प्रार्थये, मम तु मनोरथाशंसापि नास्ति, शकुन्तलाप्राप्तिस्तु दूरे आस्तां तस्या अत्यन्तासम्भवात्। अतः शकुन्तलासमागमस्यासम्भाव्यत्वान्नैराश्ये प्राप्तिसूचकं ते स्फुरणं निरर्थकमेव। तथाहि—प्रथमं तिरस्कृतं कल्याणं दुःखरूपेण परिणमति। तथा च पूर्वकृता शकुन्तलावधीरणा मम चित्ते दुःखरूपेणैव परिणता भवतीति भावः॥ १३॥

(नेपथ्ये=रङ्गपृष्ठभागे परोक्षे वा) खल्विति निश्चयेन, चपलताम्=चापल्यम्, मा कुरु!

राजा—जैसा आप योग्य समझें, करें। **(इस प्रकार कहकर बैठ जाता है।)**

(मातलि चला जाता है।)

राजा—(शुभ लक्षण की सूचना कर)

मैं अभीष्ट वस्तु की प्राप्ति के लिए अभिलाषा नहीं रखता तब हे बाहु! तू व्यर्थ क्यों फड़क रहा है? जब मैंने उस समय कल्याण का अनादर कर दिया तो अब उसके बदले मुझे कष्ट ही प्राप्त होगा॥ १३॥

(नेपथ्य में) चञ्चलता मत कर, तू जहाँ रहता है वहीं अपना स्वभाव दिखाता रहता है।

The king—As you think *(Stays).*

(Mātali exits)

The king—*(Indicating an omen)*

I hope (not to gain the object) of my desire. Why do you throb. O arm! in vain? My bliss has been repudiated before, misery indeed is around me now. (13)

(Behind the scenes) Do not do rashness. Wherever you go

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(कर्णं दत्त्वा) अभूमिरियमविनयस्य, तत् को नु खल्वेवं निषिध्यते। (शब्दानुसारेणावलोक्य सविस्मयम्) अये! को नु खल्वयमवरुध्यमानस्तापसीभ्यामबालसत्त्वो बालः?

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेशरम्।
प्रक्रीडितुं सिंहशिशुं करेणैवावकर्षति॥ १४॥

यस्मिन् तस्मिन्नेव=यत्र तत्र सर्वत्र, स्वस्मात् बलिष्ठेऽपि, आत्मनः=क्षत्रियस्य बालस्य वा, प्रकृतिं=स्वभावम्, दर्शयसि।

राजा—(कर्णं दत्त्वा) अविनयस्य=औद्धत्यस्य, इयमभूमिः=इदमस्थानम्। तत्=तस्मात्, कः=जनः, नु इति जिज्ञासायां, खल्विति सम्बोधने, इयम्=इदम्, निषिध्यते=अविनयाद् वार्य्यते। (अत्र महर्षीणां तपःक्षेत्रत्वादशिष्टाचारस्यावकाशोऽपि नास्ति ततः कः कम्, निषिध्यते=अविनयाद् वार्य्यते।) (शब्दस्य अनुसारः=अनुसरणं, तेन शब्दानुसारेण=यस्माद्देशात् उपरोक्तं शब्द आयातस्तस्मिन् देशे दृष्टिपातेन, अवलोक्य=दृष्ट्वा, सविस्मयम्=साश्चर्यम्) अये! इति विस्मये, तापसीभ्याम्= तपस्विनीभ्याम्, अवरुध्यमानः=अवष्टभ्यमानः (ध्रियमाणः), अबालम्=अस्तोकं (प्रभूतम्), सत्त्वं=पराक्रमः, यस्य सः अबालसत्त्वः, को नु=कः (अयं), बालः=शिशुः।

अन्वयः—मातुः अर्धपीतस्तनम् आमर्दक्लिष्टकेशरं सिंहशिशुं प्रक्रीडितुं करेणैव अवकर्षति॥ १४॥

अर्धपीतेति। मातुः=सिंहशिशोरेव जनन्याः, केशरिण्याः, अर्द्धम्=असमग्रम्, यथा स्यात्तथा पीतः स्तनः=स्तननिःसृतदुग्धम् (स्तन्यम्), येन तम् अर्धपीतस्तनम्, आमर्द्देन=तेनैव बालकेन कृतविमर्द्देन, क्लिष्टाः=सपीडं स्रस्ताः, केशराः=शटाः, यस्य तम् आमर्द्दक्लिष्टकेशरम्, सिंहशिशुम्=केशरिशावकम्, प्रक्रीडितुम्=मनोविनोदार्थं क्रीडां कर्त्तुम्, करेणैव=हस्तेनैव, अवकर्षति=आकर्षति। अत्र स्वभावोक्तिरलङ्कारः। पथ्यावक्त्रं वृत्तम्॥ १४॥

राजा—(कान देकर) यह स्थान तो अशिष्टाचरण के योग्य नहीं है फिर किसे रोका जा रहा है। **(शब्द की दिशा में देखकर, आश्चर्य के साथ)** ओह! यह बालक कौन है जिसे दो तापसियाँ रोक रही हैं। इसकी शक्ति तो असाधारण प्रतीत होती है।

जिस (सिंहशिशु) ने अभी अपनी माँ के स्तनों से आधा ही दूध पीया है तथा जिसके केसर मसलने के कारण छितराये हुए हैं ऐसे सिंहशावक को अपने साथ खेलने के लिए यह (कौन बालक) हाथ से ही (अन्य किसी साधन से नहीं) खींच रहा है।॥ १४॥

---

you show your nature. (every where your naughtiness remains with you).

The king—*(Listening)* This is no place for rudeness, who may indeed be this that is thus checked? *(Looking in the direction of the voice, with amazement)* Oh! who may indeed be this boy of unboy-like strength, closely attended by two female hermits.

Who is this boy, who is dragging away the cub from the lioness (his mother) whose mane are disorderd, forcibly, for sport, who has only sucked half milk from its mother, by his hand only. (14)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ततः प्रविशति यथानिर्दिष्टकर्म्मा तापसीभ्यां सह बालः)

बालः—जिह्म ले सिंहसावआ! जिह्म, दंताइं दे गणइस्सं। **[जृम्भस्व रे सिंहशावक! जृम्भस्व, दन्तान् ते गणयिष्यामि।]**

प्रथमा—अविणीद! किं णो अवच्चणिव्विसेसाइं सत्ताइं विप्पअरेसि। हंत! वड्ढइ विअ दे संरंभो। ट्ठाणे क्खु इसिजणेण सव्वदमणोत्ति किदणामहे ओसि। **[अविनीत! किं नः अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि। हन्त! वर्द्धत इव ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।]**

राजा—किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे हृदयम्? (विचिन्त्य) नूनमनपत्यता मां वत्सलयति।

भावार्थः—अन्यः खलु बालः कस्याप्याकर्षणमेव नैव कर्त्तुमर्हति, तत्रायं बालः सिंह-शावकं मातुः क्रोडात् स्तन्यं पिबन्तं केनचिद् दण्डादिना विना स्वकरेणैव तस्य शटा धृत्वा स्वमनोविनोदार्थम् इतिं भावः॥ १४॥

(ततः=तदनन्तरम्, यथानिर्दिष्टम्=सिंहशावकाकर्षणरूपं, कर्म यस्य सः यथानिर्दिष्टकर्मा= सिंहीसकाशात् जटायां सिंहशावकमाकर्षन्, तापसीभ्याम्=तपस्विनीभ्यां, सह=साकम्, बालः= शिशुः।)

बालः—जृम्भस्व=विदारितास्यो भव, रे सिंहशावक=सिंहशिशु! जृम्भस्व, ते=तव, दन्तान्=दंष्ट्राः, गणयिष्यामि=सङ्ख्यास्यामि।

प्रथमा—अविनीत=दुःशील! किं=कथम्, नः=अस्माकम्, अपत्येभ्यः=सन्तानेभ्यः, निर्विशेषाणि=अभिन्नानि (सन्तानतुल्यानि), अपत्यनिर्विशेषाणि, सत्त्वानि=जन्तून्, विप्रकरोषि= उत्पीडयसि। हन्तेति विषादे, ते=तव, संरम्भः=दर्पः (आटोपः), वर्द्धत इव। स्थाने खलु= अन्वर्थत्वात् युक्तमेव, ऋषिजनेन=तापसजनेन, सर्वदमनः—सर्वान्=समस्तान् प्राणिनः, दमयति= अभिभवतीति सर्वदमनः, कृतं नामधेयं=नाम, यस्य कृतनामधेयः असि।

(इसके पश्चात् दो तापसियों के साथ पूर्वोक्त व्यापार में संलग्न बालक का प्रवेश।)

बालक—रे सिंहशावक! मुँह फैला (जम्हाई ले), मैं तेरे दाँत गिनूँगा।

पहली तापसी—दुर्विनीत! हमारे बालकों के समान इन जन्तुओं के शिशुओं को क्यों कष्ट देता है? हाय! तेरा गर्व तो बढ़ता ही जाता है। ऋषियों ने तेरा सर्वदमन नाम अन्वर्थक ही रखा है।

(Then enter a boy engaged as described with two female hermits)

Boy—Yawn o child of lion! yawn, I shall count your teeth.

First ascetic woman—Undisciplined one! why do you lease the animals, which are to us not different from our children. Oh! your turbulence is increasing. Rightly, indeed, are you named Sarvadamana (the tamer of all) by the sages.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीया—एसा तुमं केसरिणी लंघइस्सदि, जइ से पुत्तअं णं मुंचिस्सदि। [एषा त्वां केशरिणी लङ्घयिष्यति, यद्यस्याः पुत्रकं न मोक्ष्यसि।]

बालः—(सस्मितम्) अम्हहे! बलिअं क्खु भीदम्हि। [अहो! बलीयः खलु भीतोऽस्मि।] (इत्यधरं दर्शयति)

राजा—(सविस्मयम्)

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधोऽपेक्ष इव स्थितः॥ १५॥

राजा—किं नु इति वितर्के, अस्मिन्=दृश्यमाने, बाले=बालके, औरसे पुत्रे इव=आत्मजे इव, मे=मम, हृदयम्=चेतः, स्निह्यति=स्नेहं करोति। (विचिन्त्य=विचार्य्य) नूनम्=निश्चयेन, अनपत्यता=सन्तानशून्यता, मां=दुष्यन्तम्, वत्सलयति=वात्सल्ययुक्तं करोति।

द्वितीया तापसी—एषा=पुरःस्थिता, केशरिणी=सिंही, त्वाम्=सर्वदमनम्, लङ्घयिष्यति= आक्रमिष्यति, यदि, अस्याः=सिंह्याः, पुत्रकं=क्षुद्रं पुत्रम्, न मोक्ष्यसि।

बालः—(सस्मितम्=सेषद्धासम्) अहो=इति उपहासपूर्णसम्बोधने, बलीयः खलु=अत्यर्थमेव, भीतोऽस्मि=भयाक्रान्तोऽस्मि (विपरीतलक्षणया सिंहीतो मनागपि न बिभेमीत्यर्थः)। (इति=इत्युक्त्वा, अधरम्=अधरोष्ठं, दर्शयति=प्रसार्य्य तापस्यै दर्शयति)

राजा—(सविस्मयम्=साश्चर्यम्)

अन्वयः—एधोऽपेक्षः स्फुलिङ्गावस्थया वह्निः इव अयं बालः मे महतः तेजसः बीजं प्रतिभाति॥ १५॥

राजा—मेरा हृदय इस बालक पर औरस पुत्र के समान क्यों स्नेह कर रहा है? **(विचारकर)** निश्चय ही सन्तान का अभाव मुझे वात्सल्य प्रेम से युक्त कर रहा है।

दूसरी तापसी—यदि तू इसके बच्चे को नहीं छोड़ेगा तो यह सिंहनी तुझे धर दबायेगी।

बालक—(मुस्कराकर) अरे! मैं तो बहुत डर गया। **(ऐसा कहकर अधरोष्ठ दिखाता हुआ उसे चमकाता है।)**

राजा—(विस्मयपूर्वक) ईंधन की अपेक्षा रखने वाले अग्निकण के समान यह बालक भविष्य में बड़ा तेजस्वी होगा—ऐसा मुझे जान पड़ता है॥ १५॥

The king—Why, indeed, does my mind feel affection for this boy as for a heart-begotten son? *(Verily)*, childlessness makes me affectionate.

Second ascetic woman—This lioness will surely attack you, if you do not let off her cub.

Boy—(With a smile) Oh! I am indeed greatly frightened! *(Shows his lower lip).*

The king—(with surprise) This boy, the seed of a great lustre, appears to me to be like fire remaining in the state of a spark and awaiting fuel. (15)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमा—वच्छ! एदं मुंच वालमइंदअं अवरं दे कीलणअं दाइस्सं। **[वत्स! मुञ्च बालमृगेन्द्रकम्, अपरं ते क्रीडनकं दास्यामि।]**

बालः—कहिं देहि णं। **[कस्मिन् देहि एनम्।]** (इति हस्तं प्रसारयति)

राजा—(बालस्य हस्तं दृष्ट्वा) कथं चक्रवर्त्तिलक्षणमप्यनेन धार्यते।

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम्॥ १६॥

महत इति। एधः=काष्ठम्, अपेक्षत इति एधोऽपेक्षः, स्फुलिङ्गावस्थया=कणमात्ररूपेण स्थितिः, वह्निः=अग्निरिव, अयं=पुरोवर्त्ती, बालः=शिशुः, मे=मम सम्बन्धे, महतः=प्रभूतस्य, तेजसः=प्रभावस्य, वह्निपक्षे=दीप्तेश्च, बीजं=कारणम्, प्रतिभाति=प्रतीतिविषयो भवति। अत्र श्रौतोपमालङ्कारः, पथ्यावक्त्रं वृत्तम्॥ १५॥

भावार्थः—यथा एधोऽपेक्षोऽग्निकणो महादीप्तेः कारणं भवेत् तथाऽयं शिक्षापेक्षो बालो महाप्रभावस्य कारणं भविष्यतीति मे प्रतिभाति इति भावः॥ १५॥

प्रथमा—वत्स=पुत्र! एतं=तव करपाशस्थितम्, बालमृगेन्द्रकम्=सिंहशावकम्, मुञ्च=त्यज। ते=तुभ्यम्, अपरम्=अन्यम्, क्रीडनकम्=क्रीडासाधनम्, दास्यामि=प्रदास्यामि।

बालः—कस्मिन्=क्रीडनकं कस्मिन् स्थाने अस्ति इति भावः, एनम्=क्रीडनकम्, देहि। (इति=इत्युक्त्वा, हस्तं=करम्, प्रसारयति=क्रीडनक-आदानार्थं करं प्रसारयति।)

राजा—(बालस्य=सर्वदमनस्य, हस्तं=करं, दृष्ट्वा=अवलोक्य) कथमिति विस्मये, चक्रवर्त्तिलक्षणम्=सार्वभौमचिह्नम्, अपि, अनेन=बालेन, धार्य्यते।

अन्वयः—प्रलोभ्यवस्तुप्रणयप्रसारितः जालग्रथिताङ्गुलिः करः इद्धरागया नवोषसा भिन्नम् अलक्ष्यपत्रान्तरम् एकं पङ्कजम् इव विभाति॥ १६॥

प्रलोभ्येति। प्रलोभ्यं=प्रलोभकारकं, यद् वस्तु=क्रीडनकादिकं, तत्र यः प्रणयः=प्रीतिः प्रार्थना वा, तेन प्रसारितः=विस्तृतः, प्रलोभ्यवस्तुप्रणयप्रसारितः, जालवत्=गवाक्षवत्, ग्रथिताः=

पहली तापसी—पुत्र! इस सिंहशावक को छोड़ दो, मैं तुम्हें और खिलौना दूँगी।

बालक—कहाँ है खिलौना? लाओ दो। **(हाथ फैलाता है।)**

राजा—**(बालक का हाथ देखकर)** क्या? इसके हाथ में तो चक्रवर्ती सम्राट् के लक्षण हैं।

पूर्व उषा के आगमन के साथ-साथ कुछ-कुछ अन्धकार के कारण जिसके दल अलग-अलग परिलक्षित नहीं होते तथा देदीप्यमान रक्तिम प्रभात द्वारा विकसित कमल जैसे

First ascetic woman—Child! release this cub. I shall give you another toy.

Boy—Where? give that. *(Extends his hand)*

The king—How! the sign of a universal monarch (emperor) is also borne by him. For his—

Hand, extended to beg for the object which is desired by him and having its fingers connected as in a web, shines like a single

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीया—सुव्वदे! मुंच णं। ण एसो सक्को वाओमेत्तेण समइदुं ता गच्छ ममकेरए उडए संकोचणस्स इसिकुमारस्स वण्णचित्तिदो मट्टिआमोरओ चिट्ठदि, तं से उवहर। [**सुव्रते! मुञ्चैनम्। नैष शक्यो वाङ्मात्रेण शमयितुम्। तद् गच्छ, मदीये उटजे सङ्कोचनस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति, तमस्योपहर।**]

प्रथमा—तह। [**तथा।**] (इति निष्क्रान्ता)

परस्परं निरन्तरसंश्लिष्टाः, अङ्गुलयो यस्मिन् सः जालग्रथिताङ्गुलिः, करः=हस्तः, इद्धः=प्रकाशितः, रागः=लौहित्यं, यस्याः सा तया इद्धरागया, नवोषसा=उषःप्रारम्भेण, भिन्नं=स्फुटितीकर्त्तुमारब्धम् (विघटितं), अलक्ष्याणि=तदानीमप्यालोकातिशयाभावादननुभवनीयानि, पत्राणां=दलानाम्, अन्तराणि=परस्परावकाशदेशाः, यस्य तत् अलक्ष्यपत्रान्तरम्, एकम्=अद्वितीयम्, पङ्कजम्=कमलम्, इव, विभाति=शोभते। अत्र वंशस्थविलं वृत्तम्॥ १६॥

भावार्थः—यथा पूर्वसन्ध्यायां प्रथममुपस्थितायामेवालोकातिशयाभावेनेषद्विकचभावमाप्नुवतोऽपि कस्यचित् कमलस्य कतिपयदलमात्रं विकसितं परिलक्ष्यते न तु दलान्तर्देशः, तथा क्रीडनकादानाय करप्रसारणकाले कतिपयाङ्गुलिमात्रं परिलक्ष्यते न त्वङ्गुलिसन्धिभाग इति भावः॥ १६॥

द्वितीया—सुव्रते! सख्याः सम्बोधनं, एनम्=बालकम्, मुञ्च=त्यज। एषः=बालकः, वाङ्मात्रेण=केवलवचनेन, शमयितुं=निवर्त्तयितुम्, न शक्यः। तद्=तस्मात्, गच्छ, मदीये=मामकीने, उटजे=पर्णशालायाम्, सङ्कोचनस्य=तन्नाम्नः, ऋषिकुमारस्य=तापसपुत्रस्य, वर्णचित्रितः—वर्णैः= रक्तपीतादिभिः, चित्रितः=अनुरञ्जितः, चित्रीकृतः, मृत्तिकामयूरः=मृत्तिकानिर्मितमयूरः, तिष्ठति= विद्यते। तम्=मयूरं, अस्य=बलकस्य समीपे, उपहर=आनय।

प्रथमा—तथा=यथा त्वं वदसि तथैव विधास्यामि (उटजान्मृत्तिकामयूरमेव आनयामि)। (इति=इत्युक्त्वा, निष्क्रान्ता=निर्गता।)

सुशोभित होता है उसी प्रकार गवाक्ष की भाँति परस्पर संश्लिष्ट अँगुलियों से युक्त ललचाने वाली एक वस्तु (खिलौने) के लिए फैला हुआ इस (बालक) का हाथ बड़ा सुन्दर लगता है॥ १६॥

दूसरी—सुव्रते! इसे छोड़ दे। इसे केवल बातों से नहीं बहलाया जा सकता। अतः जा, मेरी कुटिया में ऋषिकुमार सङ्कोचन का रङ्गा हुआ मिट्टी का मोर है, उसे इसके पास ले आओ।

पहली—जैसा तुम कहती हो। **(यह कहकर प्रस्थान)**

---

lotus opened by the early dawn, that has enhanced its redness, and having the interestics between its petals imperceptible. (16)

Second—Suvrate! it is not possible to stop him by mere words. So, you go. In my cottage there is the clay peacock, painted with colours, belonging to the hermit boy, Sankocan, present that to him.

First—Right. *(Exits)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालः—दाव इमिणा ज्जेव कीलिस्सं। [तावदनेनैव क्रीडिष्यामि।]

तापसी—(विलोक्य हसन्ती) ण मुंच णं। [ननु मुञ्चैनम्।]

राजा—स्पृहयामि खलु दुर्ललितायास्मै। (निःश्वस्य)

आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा कलुषीभवन्ति॥ १७॥

बालः—तावत्=मयूरानयनपर्यन्तम्, अनेनैव=सिंहशावकेनैव सह, क्रीडिष्यामि।

तापसी—(विलोक्य=दृष्ट्वा, हसन्ती=बालस्वभावावलोकनेन कौतुकोदयात् ईषद्धासं कुर्वन्तीत्यर्थः) ननु=इति अनुनये, एनं=मृगेन्द्रशिशुं, मुञ्च=त्यज।

राजा—दुर्ललिताय=दुर्दान्ताय, अस्मै=बालकाय, स्पृहयामि=आदातुमिच्छामि, खल्विति निश्चयेन। (निःश्वस्य=दीर्घमुष्णञ्च निःश्वस्य)।

अन्वयः—धन्याः अनिमित्तहासैः आलक्ष्यदन्तमुकुलान् अव्यक्तवर्णरमणीयवचःप्रवृत्तीन् अङ्काश्रयप्रणयिनः तनयान् वहन्तः तदङ्गरजसा कलुषीभवन्ति ते धन्याः॥ १७॥

आलक्ष्येति। धन्याः=सुकृतिनो जनाः, अनिमित्ताः=अकारणाः, ये हासाः, तैरनिमित्तहासैः=कारणं विना हास्यकरणैः, आलक्ष्याणि=ईषत्प्रेक्षणीयानि, दन्तमुकुलानि=दन्ताङ्कुराः (नवोद्गता दन्ताः), येषां तान् आलक्ष्यदन्तमुकुलान्, अव्यक्तैः=अपरिस्फुटैः, वर्णैः=अक्षरैः, रमणीया=शिशुमुखे विकलीकृत्वोच्चरितत्वेन श्रुतिसुखवहत्वात् मनोहारिणी, वचसां=वाक्यानाम्, प्रवृत्तिः=आविर्भावः, येषां तान् अव्यक्तवर्णरमणीयवचःप्रवृत्तीन्, तथा अङ्के=क्रोडे, यः आश्रयः=निवासः, तस्मिन् यः प्रणयः, तद्वतः अङ्काश्रयप्रणयिनः, तनयान्=पुत्रान्, वहन्तः=अङ्के धारयन्तः सन्तः, तेषां=पुत्राणाम्, अङ्गरजसा=गात्रधूल्या, (ये) कलुषीभवन्ति=मलिनीभवन्ति, ते धन्याः=

बालक—तब तक इसी से खेलूँगा।

तापसी—(**देखकर हँसती हुई**) अरे! इसे छोड़ दे।

राजा—इस दुर्ललित बालक को प्यार करने की इच्छा मन में जाग रही है। (**ठण्डी साँस भरकर**)

अकारण हँसने से जिसके नये-नये दाँत कभी-कभी दिखायी दे जाते हैं, तोतली वाणी से उच्चरित जिसके शब्द बहुत मधुर लगते हैं और जो गोद में आने के लिए ललक रहा हो—ऐसे पुत्र को गोद में लेने से भाग्यवानों के अङ्ग ही उस बालक के अङ्ग की धूलि से मलिन होते हैं। ऐसे लोग वस्तुतः धन्य हैं॥ १७॥

Boy—I shall play with this in the meanwhile.

Woman ascetic—(*Laughs looking at the boy*) Child! let it free.

The king—I really long for this wayward boy.

Blessed are they who, carrying their sons, who solicit shelter in their lap, whose bud-like teeth are slightly visible by causeless innocent smiles and whose attempts at speech are charming with their indistinct words, are soiled by the dust of their bodies. (17)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तापसी—(साङ्गुलीतर्जनम्) भो! ण मं गणेसि। (पार्श्वमवलोक्य) को एत्थ इसिकुमारआणं। (राजानं दृष्ट्वा) भद्दमुह! एहि दाव, मोआवेहि इमिणा दुम्मोक्खहत्थग्गहेण डिंभएण बाधीअमाणं बालमइंदअं। **[भोः! न मां गणयसि। कोऽत्र ऋषिकुमाराणाम्? भद्रमुख! एहि तावत्, मोचय अनेन दुर्मोक्षहस्तग्रहेण डिम्भकेन बाध्यमानं बालमृगेन्द्रकम्।]**

राजा—तथा। (इत्युपगम्य सस्मितम्) अयि भो महर्षिपुत्रक!

एवमाश्रमविरुद्धवृत्तिना संयमी किमिति जन्मदस्त्वया।
सत्त्वसंश्रयगुणोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः॥ १८॥

भाग्यवन्तः। न पुनर्मादृशा यः परपुत्राय स्पृहयति। अत्र अप्रस्तुतप्रशंसा, लुप्तोपमा, स्वभावोक्तिः परिसंख्यादयोऽलङ्काराः। वसन्ततिलकं वृत्तम्॥ १७॥

भावार्थः—ये सुकृतिनो जनाः अकारणहास्यकरणैः, आलक्ष्यदन्तमुकुलान्, अव्यक्त-वर्णरमणीयवचःप्रवृत्तीन्, अङ्काश्रयप्रणयिनः तनयान् क्रोडे धारयन्तः सन्तः तदङ्गरजसा मलिनी-भवन्ति त एव भाग्यवन्त न पुनर्मादृशा अपुत्रकाः जनाः इति भावः॥ १७॥

तापसी—(साङ्गुलीतर्जनम्=अङ्गुल्या तर्जनमभिनीय) भोः! न=नहि, मां=तापसीम्, गणयसि=मन्यसे। (पार्श्वमवलोक्य=पार्श्वभागे दृष्टिपातं कृत्वा) ऋषिकुमाराणां=मुनिबालकानां, मध्ये कोऽत्र वर्त्तते? (राजानं=दुष्यन्तं, दृष्ट्वा=अवलोक्य) भद्रमुख! (मान्यं प्रति सम्बोधनम्) दुर्मोक्षः=दुःखेन मोचनीयः, हस्तग्रहः=करपाशः, यस्य तेन दुर्मोक्षहस्तग्रहेण, अनेन डिम्भकेन= शिशुना, बाध्यमानम्=आकर्षणापकर्षणादिना बहुधा पीड्यमानम्, बालमृगेन्द्रकम्=सिंहशावकम्, मोचय=अस्य हस्तात् परित्रायस्व।

राजा—तथा=मोचयामीत्यर्थः। (इत्युपगम्य=एवमुक्त्वा अन्तिकं प्राप्य, सस्मितम्= सेषद्धासम्) अयीत्यनुनये, भो महर्षिपुत्रक! (सौम्यताभिप्रायेण सम्बुद्धिः)

तापसी—(**अंगुली से धमकाती हुई**) अरे! मेरी बात नहीं मानता? (**पास में देखकर**) ऋषिकुमारों में से यहाँ कौन (उपस्थित) है? (**राजा को देखकर**) भद्रमुख! आप जरा इधर आइए और जिसके हाथों से छुड़ाया जाना सर्वथा कठिन है ऐसे इस बालक के हाथ से सताये जाते हुए इस सिंहशावक को छुड़ाइए।

राजा—अच्छा (**पास आकर मुस्कराते हुए**) ओ महर्षिपुत्र!

काले साँप का बच्चा जैसे चन्दन वृक्ष को दूषित कर देता है उसी प्रकार तुम भी

Ascetic woman—How! he cares me not. *(Looking by side)* Who is here of the hermit-boys. *(Seeing the king)* Gentle sir! just come. Liberate this little lordly lion (cub), which is being tormented in boyish play by this boy, the grasp of whose hand is difficult to unloose.

The king—*(Approaching with a smile)* Oh! you son of a great sage!

Why is it that from your very birth the forbearance, though pleasant for the resort of animals, is thus violated by you, whose

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तापसी—भद्दमुह! ण क्खु एसो इसिकुमारओ। [**भद्रमुख! न खल्वेष ऋषि-कुमारकः।]**

राजा—आकारसदृशं चेष्टितमेवास्य कथयति; स्थानप्रत्ययात्तु वयमेवं तर्किणः। (यथाभ्यर्थितमनुतिष्ठन् बालकस्य स्पर्शमुपलभ्य स्वगतम्)

अन्वयः—एवम् आश्रमविरुद्धवृत्तिना त्वया सत्त्वसंश्रयः गुणः अपि जन्मदः संयमी किं कृष्णसर्पशिशुना चन्दनः इव दूष्यते॥ १८॥

एवमिति। एवम्=अनेन प्रकारेण, आश्रमविरुद्धा=तपोवनविरोधिनी, वृत्तिः यस्य तेन आश्रमविरुद्धवृत्तिना=परपीडनरूप-आश्रमविरुद्धकर्मणा, त्वया=बालकेन, सत्त्वसंश्रयः=आत्मा-वलम्बनमेव गुणो यस्य सः, चन्दनपक्षे—सत्त्वगुणेन संश्रयः= ललाटादौ तिलकरूपेण धारणमेव गुणो यस्य सः सत्त्वसंश्रयगुणोऽपि, यद्वा सत्त्वसंश्रयः=आत्मनिष्ठः, गुणः=विद्याविनयसौजन्यादिः, चन्दनपक्षे—शैत्यसौगन्ध्यादिर्यस्य सः सत्त्वसंश्रयगुणोऽपि (स्वयं गुणवानपि), जन्मदः=जनयिता, संयमी=मुनिः, किम्=कथम्, कृष्णसर्पस्य=कृष्णवर्ण-उरगस्य, शिशुना=अर्भकेण, चन्दनः=तदाख्यो वृक्ष इव, दुष्यते=निरपराधप्राणिपीडनेन कलुषीक्रियते। अत्र पूर्णोपमालङ्कारः। रथोद्धता नाम वृत्तम्॥ १८॥

भावार्थः—यथा कृष्णसर्पशिशुना स्वगरलैश्चन्दनवृक्षो दूष्यते तथैव आश्रमविरुद्धाचरणेन त्वयापि सत्त्वसंश्रयगुणः संयमी जनकः दूष्यते। इदं ते महदनुचितम्, तस्मात् बालमृगेन्द्रं मुञ्चेति भावः॥ १८॥

तापसी—भद्रमुख!=सौम्य! खल्विति निश्चयेन, एषः=पुरोवर्ती, ऋषिकुमारकः=तापस-पुत्रः, न=नास्ति।

राजा—आकारसदृशम्=आकृत्यनुरूपम्, अस्य=शिशोः, चेष्टितं=कर्म्म, कथयति= 'नायमृषिकुमारः' इति स्पष्टं विज्ञापयति, तु=किन्तु, स्थानस्य-तपोवनस्य, प्रत्ययात्=विश्वासात्,

---

आश्रम के विरुद्ध आचरण करके अपने सत्त्वगुणसम्पन्न, जितेन्द्रिय जन्मदाता को क्यों दूषित कर रहे हो?॥ १८॥

तापसी—सौम्य! यह ऋषिकुमार नहीं है।

राजा—आकृति के अनुरूप इसकी चेष्टा ही कह रही है कि यह ऋषिकुमार नहीं है, फिर इस स्थान के विश्वास से मैंने ऐसा अनुमान लगाया था। (**तापसी की प्रार्थनानुसार सिंहशावक को छुड़ाकर, बालक का स्पर्श कर मन में**)

---

behaviour is opposed to the ways of the hermitage, like a sandal tree by a young black serpent? (18)

Ascetic woman—Gentle sir! indeed he is not the son of a sage.

The king—His action itself, which is conformable to his appearance, bespeaks it. We, however, guessed in this way by reason of the place (that he is in). (*On feeling the touch of the boy while doing as requested to himself*)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रे सुखिता ममैवम्।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्रसूतः ॥ १९ ॥

तापसी—(उभौ विलोक्य) अच्चरीअं अच्चरीअं। [**आश्चर्यमाश्चर्यम्।**]

राजा—आर्ये! किमिव ?

तापसी—इमस्स बालअस्स असंबद्धे वि भद्दमुहे संवादिणी अकिदित्ति विह्मिदह्मि। अवि अ वामसीलो वि भविअ अवरिचिदस्स वि दे वअणेण पइदित्थो संवुत्तो। [**अस्य बालकस्य असम्बद्धेऽपि भद्रमुखे संवादिनी आकृतिरिव विस्मितास्मि। अपि च वामशीलोऽपि भूत्वा अपरिचितस्यापि ते वचनेन प्रकृतिस्थः संवृत्तः।**]

स्थानप्रत्ययात् (तपस्विनां स्थानमिदमिति विश्वासात्), वयम्, एवं तर्किणः=ऋषिकुमारतया अनुमानिनः। अत्र तु ऋषिकुमारेणैव भवितव्यमिति अनुमानिनः इति भावः।

(यथाभ्यर्थितम्=यथाप्रार्थितम्, अनुतिष्ठन्=कुर्वन्, बालकस्य, स्पर्शम्=गात्रसम्पर्कम्, उपलभ्य=प्राप्य, स्वगतम्)

अन्वयः—कस्यापि कुलाङ्कुरेण अनेन गात्रे स्पृष्टस्य मम एवं सुखिता किन्तु अयं यस्य कृतिनः अङ्गात् प्रसूतः तस्य चेतसि कां निर्वृतिं कुर्यात् ॥ १९ ॥

अनेनेति। कस्यापि=अनिर्दिष्टजनस्य, कुलाङ्कुरेण=वंशोऽङ्कुररूपेण, अनेन=बालकेन, गात्रे=शरीरे (अङ्गे), स्पृष्टस्य=अलिङ्गनं कुर्वतः, मम, एवम्=इत्थम्, सुखिता=सुखित्वं भवति। किन्तु अयं=बालः, यस्य कृतिनः=सुकृतिनः (महाभागस्य), अङ्गात्=शरीरात्, प्रसूतः=जातः, तस्य=कृतिनः, चेतसि=हृदि, कां निर्वृतिं=कीदृशं सुखम्, कुर्यात् इति निरूपयितुं न शक्यते। अत्र अर्थापत्तिरलङ्कारः। उपजातिर्वृत्तम् ॥ १९ ॥

भावार्थः—यस्य कस्यापि वंशोऽङ्कुररूपेण अनेन बालकेन स्पर्शमात्रेणैव मम चेतसि सुखमुत्पादितं (उत अहमित्थं सुखमनुभवामि) तस्य चेतसि कीदृशं सुखं भविष्यति योऽस्य जनकः। अहं तस्य सुखादि अनुभवं निरूपयितुं न शक्नोमि इति भावः ॥ १९ ॥

तापसी—(उभौ=दुष्यन्तं बालकञ्च, विलोक्य=दृष्ट्वा) आश्चर्यम् आश्चर्यम्=अतीव विस्मयजनकं सञ्जातम्।

राजा—आर्ये!=मान्ये! किमिव=किमाश्चर्यजनकं संवृत्तम् ?

किसी के वंश के अङ्कुरस्वरूप इस बालक के शरीर का स्पर्श कर जब मुझे इतना सुख मिला है तब भला जिस भाग्यशाली के शरीर से यह उत्पन्न हुआ होगा उसे कितना सुख प्राप्त होता होगा ? ॥ १९ ॥

तापसी—(दोनों को देखकर) आश्चर्य! आश्चर्य!!

राजा—आर्ये! आश्चर्य कैसा ?

Such is the delight in my limbs as I am touched by this scion (a descendant) of the family of some one; what bliss may be create (to beget) in the heart of that lucky person from whose body he has sprung? (19)

Ascetic woman—(Looking both) Wonder! wonder!

King—Noble lady! what possibly?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(बालकमुपलालयन्) आर्ये! न चेन्मुनिकुमारोऽयम्, तत् कोऽस्य व्यपदेश: ?

तापसी—पोरवो त्ति। [**पौरव इति।**]

राजा—(स्वगतम्) कथमेकान्ववायोऽयमस्माकम्। अत: खलु मदनुकारिणमेनमत्र-भवती मन्यते। (प्रकाशम्) अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्—

तापसी—असम्बद्धेऽपि=सर्वथा सम्पर्कशून्येऽपि, भद्रमुखे=सज्जनश्रेष्ठे त्वयि, अस्य बालकस्य, आकृति:=आकार:, संवादिनी=सुसदृशी, इति=हेतो:, विस्मितास्मि=विस्मयभावा-पन्नास्मि। अपि च=अन्यच्च, वामशील:=आश्रमविरुद्धाचारोऽपि, भूत्वा, अपरिचितस्य=अज्ञात-स्यापि, ते=तव, वचनेन=कथनेन, प्रकृतिस्थ:=शान्त:, संवृत्त:=सञ्जात:।

राजा—(बालकम् उपलालयन्=हस्तेन परामृशन्) चेत्=यदि, अयम्=दृश्यमानबाल:, मुनिकुमार:=मुनिबालक:, न=नास्ति, तत्=तदा, अस्य=बालकस्य, व्यपदिश्यते=विख्ययते अनेनेति व्यपदेश:=कुलम्, कोऽस्ति ?

तापसी—पौरव इति व्यपदेश:।

राजा—(स्वगतम्=आत्मगतम्) कथम्=किम्, अयम्=बाल:, अस्माकम्, एकान्ववाय:=अभिन्नवंश:। अत: खलु=एकान्ववायत्वेनैव हेतुना, तत्रभवती=मान्या तपस्विनी, एनं=बालकम्, मदनुकारिणम्=मत्सदृशाकृतिम्, मन्यते=अनुभवति। (प्रकाशम्=स्पष्टम्) एतत्=वक्ष्यमाणम्, पौरवाणाम्=पुरुवंशोद्भवानाम्, अन्त्यम्=चरमम्, कुलव्रतम्=कौलिको नियम:, अस्ति।

तापसी—यद्यपि आपका और इसका कोई सम्बन्ध नहीं है फिर भी आप दोनों के आकार में समानता देखकर मुझे आश्चर्य हुआ। इसके अतिरिक्त विपरीत आचरण वाला होते हुए भी आप जैसे अपरिचित के कहने से यह शान्त हो गया (यह भी आश्चर्य की बात है)।

राजा—(**बालक को प्यार करते हुए**) आर्ये! यदि यह ऋषिकुमार नहीं है तो फिर किस वंश का है ?

तापसी—पौरव वंश का ?

राजा—(**स्वगत**) तो क्या यह हमारे ही वंश का है ? इसीलिए यह तापसी इसे हमारे अनुरूप मान रही है। (**प्रकट**) किन्तु पुरुवंशियों का तो यह (तपोवन में निवास) अन्तिम कुलव्रत है। क्योंकि—

Ascetic woman—That your form corresponds with the appearance of this boy. I am surprised that he has become calm or has proved not obstinate to you though unacquinted with him.

The king—*(Fondling the child)* If he has not the son of a sage, then what is his race or line?

Ascetic woman—Purū's race.

The king—*(To himself)* How! This is a colineal of me. Hence indeed her ladyship thinks him as similar to me. *(Aloud)* But there exists this final vow of the descendents of Purū.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवनेषु सुधासितेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि पश्चात् तरुमूलानि गृहीभवन्ति तेषाम्॥ २०॥

कथं पुनरात्मगत्या मानुषाणामेष विषयः ?

तापसी—जधा भद्दमुहो भणादि। किंतु अच्छरासंबंधेण उण इमस्स बालअस्स जणणी इधज्जेव देवगुरुणो तवोवणे पसूदा। **[यथा भद्रमुखो भणति। किन्तु अप्सरःसम्बन्धेन पुनरस्य बालकस्य जननी इहैव देवगुरोस्तपोवने प्रसूता।]**

अन्वयः—ये पूर्वं क्षितिरक्षार्थं सुधासितेषु भवनेषु निवासम् उशन्ति, तेषां पश्चात् नियतैकयतिव्रतानि तरुमूलानि गृहीभवन्ति॥ २०॥

भवनेष्विति। ये=पौरवाः, पूर्वं=यौवने वयसि, क्षितिरक्षार्थम्=भुवः परिपालनार्थम्, सुधाभिः=भित्तिलेपनसाधनभूतद्रव्यविशेषैः, सितेषु=धवलेषु, सुधासितेषु, भवनेषु=प्रासादेषु, निवासम्=अवस्थितिम्, उशन्ति=कामयन्ते। तेषां=पौरवाणामेव, पश्चात्=वृद्धावस्थायाम्, नियतम्=अवश्यकर्तव्यतया विहितं, एकं=केवलं, यतिव्रतं येषु तानि नियतैकयतिव्रतानि, तरुमूलानि=तपोवनवृक्षतलानि, गृहीभवन्ति=गृहाणि भवन्ति। अत्र परिणामालङ्कारः। औपच्छन्दसिकं वृत्तम्। अत्र केचित् व्यस्तरूपकमपि मन्यन्ते॥ २०॥

भावार्थः—ये पौरवाः पूर्वं प्रथमे वयसि क्षितिरक्षार्थं धवलहर्म्येषु निवसन्ति त एव वार्धक्ये तरुमूलमाश्रयन्ति, परन्तु अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्, ततः कथमेकान्ववायोऽयमस्माकमिति भावः॥ २०॥

कथमिति आशङ्कायाम्, मानुषाणाम्=मर्त्यानाम्, एषः=स्वर्गीयदेशः (मारीचाश्रमः), कथं पुनः, आत्मगत्या=केवलमानुषगत्या, विषयः=आश्रययोग्यः, स्यादिति। (यतः मनुष्याणां स्वभावत एवायमगम्य इति कथं वात्र पौरवाणां पुत्रसम्भव इति शङ्काशयः।)

तापसी—भद्रमुखः=भवान्, यथा भणति=कथयति, तत्तथेति शेषः। किन्तु अप्सरः-

---

वे अपने यौवनकाल में पृथ्वी-पालनार्थ चूने से पुते हुए धवल भवनों में निवास की इच्छा करते हैं और वार्धक्य में यतियों के व्रत को अपना कर वृक्षों के मूल भाग को ही अपना घर बनाते हैं॥ २०॥

परन्तु यह स्थान मनुष्य की अपनी गति से तो पहुँच के बाहर ही है अर्थात् मानव अपनी गति से तो यहाँ पहँचने से रहा।

तापसी—जैसा आप कह रहे हैं (वह ठीक है) परन्तु अप्सरा से सम्बन्ध रखने के कारण इस बालक की माँ ने इसे यहीं देवगुरु मरीचि के आश्रम में जन्म दिया है।

To them, who in early life desire to live in residence in white washed palaces for the protection of the earth, the feet of trees, where the sole-vow of asceticism is rigidly observed, become afterwards homes. (20)

But this is no region for the mortals (to come to) by their own motion.

Ascetic woman—As the gentle one says. Owing to her

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(स्वगतम्) हन्त! द्वितीयमिदमाशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी।

तापसी—को तस्स धम्मदारपरिच्चाइणो णामं कीत्तइस्सदि। **[कस्तस्य धर्म्मदार-परित्यागिनो नाम कीर्त्तयिष्यति।]**

राजा—(स्वगतम्) कथमियं कथा मामेव लक्ष्यीकरोति। यावदस्य शिशोर्मातरं नामतः पृच्छेयम्। (विचिन्त्य) अथवा अनार्यः खलु परदारपृच्छाव्यापारः।

तापसी—(प्रविश्य मृन्मयूरहस्ता) सव्वदमण! पेक्ख! सउंतलावण्णं। **[सर्वदमन! प्रेक्षस्व शकुन्तलावण्यम्।]**

सम्बन्धेन=अप्सरःसहकारेण, पुनरस्य बालकस्य=अस्य दृश्यमानबालकस्य, जननी=माता, इहैव=अत्रैव, देवगुरोः=इन्द्रपितुः, पिताकण्वस्य, तपोवने=आश्रमे, प्रसूता=प्रसुषुवे।

राजा—(स्वगतम्=आत्मगतम्) हन्त=इति हर्षे, इदम्=अप्सरःसम्बन्धकथनम्, द्वितीयम्=अपरम्, आशाजननम्=एतत् शिशुगतपुत्रत्वविषयकमनोरथसञ्चारकम् (शकुन्तलाया मेनकापत्यत्वादिति भावः)। (प्रकाशम्=प्रगटम्) अथ इति प्रश्ने, सा=अस्य जनयित्री, किमाख्यस्य=किन्नामधेयस्य, राजर्षेः=ऋषिकल्पस्य राज्ञः, पत्नी=भार्या?

तापसी—कः=जनः, धर्मदारपरित्यागिनः=अधर्मशीलस्य, धर्मपत्नीपरित्यागिनः पापिनः, तस्यः=राज्ञः, नाम, कीर्तयिष्यति=ग्रहीष्यति।

राजा—(स्वगतम्) कथम्=किम्, इयं कथा=तापस्युक्तप्रकारा कथा, मामेव=दुष्यन्तमेव, लक्ष्यीकरोति=विषयीकरोति। यावदिति वाक्यालङ्कारे, अस्य शिशोः=बालकस्य, मातरं=जननीम्, नामतः=नाम्ना, पृच्छेयम्=ज्ञातुमिच्छेयम्। (विचिन्त्य=विचार्य) अथवा, परदारपृच्छाव्यापारः=परदारविषयकप्रश्नप्रसङ्गः, अनार्यः=अनुचितः, खल्विति निश्चयेन।

राजा—(स्वगत) अरे! यह तो दूसरी आशाजनक बात सामने आई। **(प्रकट)** हाँ, तो वे मान्या किस राजर्षि की पत्नी हैं?

तापसी—अपनी धर्मपत्नी का परित्याग करने वाले का नाम भला कौन लेगा?

राजा—(स्वगत) क्या यह बात मुझ को ही लक्ष्य कर रही है? तो क्या इस बालक की माता का ही नाम पूछूँ? **(सोचकर)** नहीं परायी स्त्री का नाम पूछना उचित नहीं है।

...ationship with an apsarā (nimph), his mother was delivered here i... he penance-grove of the father of the Gods.

The king—(To himself) Oh! here is the second creator of hope. *(Aloud)* well! of what royal sage is her ladyship the wife.

Ascetic woman—Who will think of mentioning the name of that deserter of his lawful wife?

The king—(To himself) This story surely points to myself alone. If I question about this child's mother concerning her name. *(Thinking)* It is improper to enquire about another's wife.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालः—(सदृष्टिक्षेपम्) कहिं सा मे अंबा। **[कस्मिन् सा मे अम्बा।]**

(उभे प्रहसतः।)

प्रथमा—णामसारिस्सेण उबच्छंदिदो मादिवच्छलो। **[नामसादृश्येन उपच्छन्दितो मातृवंत्सलः।]**

द्वितीया—इमस्स मोरस्स रमणीअदं पेक्खेत्ति भणिदोसि। **[अस्य मयूरस्य रमणीयतां प्रेक्षस्वेति भणितोऽसि।]**

राजा—(स्वगतम्) किं शकुन्तलेत्यस्य मातुराख्या। अथवा सन्ति पुनर्नामधेय-सादृश्यानि, अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते।

तापसी—(प्रविश्य=प्रवेशं विधाय, मृन्मयूरहस्ता=हस्ते मृन्मयमयूरं गृहीत्वा) सर्वदमन! शकुन्तस्य=पक्षिणः, लावण्यम्=कान्तिविशेषणम्, प्रेक्षस्व=अवलोकय (शकुन्तलायाः=तदाख्यायाः, स्वमातुः वर्णम्=रूपम्)।

बालः—(सदृष्टिक्षेपम्=इतस्ततो दृष्टिं सञ्चाल्य) कस्मिन् स्थाने, सा=शकुन्तलाभिधाना, मे=मम, अम्बा=माता।

(उभे=तापस्यौ, प्रहसतः=उच्चैर्हसतः।)

प्रथमा—नामसादृश्येन=शकुन्तलेति वर्णसाम्यात्, उपच्छन्दितः=मातृनिमित्तं प्रलोभितः, मातृवत्सलः=मातरि स्नेहवान् अयं बालः।

द्वितीया—अस्य मयूरस्य=मृन्मयूरस्य, रमणीयताम्=सौन्दर्यम्, प्रेक्षस्व=अवलोकय, इति भणितोऽसि=एवमुक्तोऽसि, न तु शकुन्तलावर्णम्।

राजा—(स्वगतम्=अस्पष्टम्) अस्य=बालकस्य, मातुः=जनन्याः, शकुन्तलेति

तापसी—**(हाथ में मिट्टी का मोर लिये हुए प्रवेश)** सर्वदमन! देख इस पक्षी का रङ्ग।

बालक—**(इधर-उधर देखकर)** कहाँ है वह मेरी माँ?

(दोनों तापसियाँ हँसती हैं।)

प्रथम तापसी—हमने नाम के सादृश्य से ही इस मातृवत्सल बच्चे को लुभा लिया।

दूसरी तापसी—हमने 'इस मोर की सुन्दरता देखो' यह कहा था।

राजा—**(स्वगत)** क्या इसकी माता का नाम शकुन्तला है? अथवा नामों में प्रायः

***Ascetic woman**—(Entering with a clay-peacock in hand)* Sarvadaman! Look at the beauty of this bird.

***Boy**—(Casting a glance)* Well! where is my mother?

(Both women laugh)

First ascetic woman—Fond of his mother, he is deceived by the resemblance (of the syllables) with the name.

Second ascetic woman—Child! look at the loveliness of this clay peacock—thus you were addressed.

***The king**—(To himself)* What! is Śakuntalā his mother's

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालः—अंतिए! रोअदि मे चडुलके एसे मौले। [**अन्तिके! रोचते मे चटुलक एष मयूरः।**] (इति क्रीडनकमादत्ते)

प्रथमा—(विलोक्य सावेगम्) अम्मो! रक्खाकांडओ से मणिबंधे ण दीसदि। [**अहो! रक्षाकाण्डकः अस्य मणिबन्धे न दृश्यते।**]

राजा—आर्ये! अलमावेगेन। नन्वयमस्य सिंहशावकस्य विमर्दात् परिभ्रष्टः। (इत्यादातुमिच्छति)

आख्या=नाम किम्? अथवा सन्ति पुनर्नामधेयसादृश्यानि=अन्यस्या अपि एवं नाम सम्भवतीति भावः। अपीति शङ्कायाम्, नामेति सम्भावनायाम्, मृगतृष्णिकेव=सूर्यमरीचिषु उदकबुद्धिरिव, नाममात्रप्रस्तावः=केवलं शकुन्तलेति नाममात्रोल्लेखः, मे=मम, विषादाय=खेदाय, कल्पते=भवति। (यथा मृगतृष्णिकायां पिपासोर्जलभ्रान्तिरेव भवति न तु तत्र वस्तुतो जलं तथात्र नाममात्रेणैव सादृश्यं न तु वस्तुतः शकुन्तलेत्यतो मे विषाद एव वर्द्धते न पुनः शकुन्तलाप्राप्तिसम्भावनेति सरलार्थः।)

बालः—अन्तिके=हे ज्येष्ठभगिनि! एषः चटुलः=चञ्चलः, मयूरः, मे=मह्यम्, रोचते= रुचिकरः प्रतीयते। (इति=इत्युक्त्वा, क्रीडनकम्=मृत्तिकामयूरम्, आदत्ते=गृह्णाति।)

प्रथमा—(विलोक्य=दृष्ट्वा, सावेगम्=ससम्भ्रमम्) अहो इति विस्मये, अस्य=बालकस्य, मणिबन्धे=प्रकोष्ठे, रक्षाकाण्डकः=रक्षार्थमाबद्धो वलयाकारसमूललतौषधविशेषः, न दृश्यते= नास्माकं दृष्टिपथमायाति (नावलोक्यते)।

राजा—अलमिति निषेधे, आवेगेन=सम्भ्रमेण, नन्वित्यवधारणे, अयं=भूतले दृश्यमानः रक्षाकाण्डकः, अस्य सिंहशावकस्य=सिंहशिशोः, विमर्दात्=एतद्बालककर्तृकसङ्घर्षणात्,

---

समानता हो जाती है। मृगमरीचिका की भाँति केवल शकुन्तला इस नाम के लेने से मेरे हृदय में विषाद उत्पन्न हो गया।

बालक—अन्तिके! मुझे यह चञ्चल मयूर अच्छा लगता है। (**यह कहकर खिलौना ले लेता है।**)

पहली तापसी—(**देककर घबराहट के साथ**) ओ! इसकी कलाई में रक्षासूत्र नहीं दिखायी पड़ रहा है।

राजा—आर्ये! आप घबरायें नहीं। इस सिंहशावक के साथ संघर्ष करते समय यह यहाँ गिर पड़ा है। (**यह कहकर उसे उठाना चाहता है**)

---

name? But there do exist resemblanc (similarity) of names. Is it possible that this occasion here, like a mirage would not conduce to my distress *(fickle)?*

Boy—Antike! this beautiful peacock pleases me.

First ascetic woman—*(Observing with confusion)* Oh! the amulate of protection is not seen on his wrist.

The king—Please do not be afraid *(Away away with agitation).* Why! here it hes fallen owing to his rough encounter with the lion's cub. *(Desires to take it up)*

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उभे—मा क्खु मा क्खु एदं। (विलोक्य) कधं गहिदो ज्जेव? **[मा खलु मा खलु एतम्। कथं गृहीत एव ?]** (विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः)

राजा—किमर्थं भवतीभ्यां प्रतिषिद्धोऽस्मि।

प्रथमा—सुणादु महाभाओ। एसा महाप्पहावा अवराजिदा णाम सुरमहोसही, इमस्स दारअस्स जादकम्मसमए भअवदा मारीएण दिण्णा। एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपदिदं ण गेहादि। **[शृणोतु महाभागः। एषा महाप्रभावा अपराजिता नाम सुरमहौषधिः। अस्य दारकस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरौ आत्मानञ्च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति।]**

परि''ष्टः=मणिबन्धात् भूतले विच्युतः। (इति=इत्युक्त्वा, आदातुं=ग्रहीतुम्, भूतलादुत्तोलयितुम्, इच्छति=कामयते, उपक्रमते।)

उभे—मा खलु मा खलु एतं=रक्षाकाण्डकं मा स्पृश। (विलोक्य=दृष्ट्वा) कथं गृहीत एव=भूतलादुत्तोल्य हस्ते धृत एव किम्? (विस्मयात्=आश्चर्यात्, उरसि=वक्षसि, निहितौ=स्थापितौ, हस्तौ याभ्यां ते उरोनिहितहस्ते, परस्परम्=अन्योन्यं, अवलोकयतः।)

राजा—किमर्थम्=कथम् (केन कारणेन), भवतीभ्याम्, प्रतिषिद्धोऽस्मि=रक्षाकाण्ड-ग्रहणविषये वारितोऽस्मि।

प्रथमा—महाभागः=महैश्वर्यशाली भवान्, शृणोतु। एषा, महाप्रभावा=महाशक्तिशालिनी, अपराजिता नाम=अपराजितेति नाम्ना प्रसिद्धा, सुरमहौषधिः=देवलोके महौषधिरूपेण ख्यातनामा, दारकस्य=शिशोः, जातकर्मसमये=नाडीच्छेदात् प्राक् अनुष्ठीयमानजातकर्माख्यसंस्कारकरणसमये, भगवता मारीचेन=भगवता कश्यपेन, दत्ता=प्रदत्ता। एतां=महौषधिं, मातापितरौ, तथा आत्मानञ्च=

दोनों तापसियाँ—नहीं नहीं, इसे न उठाइए। **(देखकर)** क्या उठा ही लिया?

(विस्मयपूर्वक छाती पर हाथ रखे दोनों एक-दूसरे को निहारती हैं।)

राजा—आप दोनों ने मुझे क्यों रोका था?

पहली—श्रीमान् सुनिये! यह अतिशय प्रभावशालिनी अपराजिता नामक देव-महौषधि है। इस बालक के जातकर्म के समय स्वयं भगवान् कश्यप ने यह औषधि दी थी। इसे माता-पिता और स्वयं धारक को छोड़कर पृथ्वी पर गिर जाने पर अन्य नहीं उठाता (उठा सकता)—ऐसी व्यवस्था उन्होंने की है।

Both ascetic woman—Not indeed, not indeed take it. *(Seeing)* How! taken by him.

(Through amazement they stare at each other with hands placed on their bosom)

The king—For what were we forbidden?

First—May your majesty hear. This is a herb named Aparājitā given by his reverence Mārīci at the time his natal ceremony. No one indeed, excepting the parents and oneself, takes it up when fallen on the ground.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अथ गृह्णाति ?

प्रथमा—तदो सप्पो भविअ तं दंसइ। **[ततः सर्पो भूत्वा तं दशति।]**

राजा—अत्रभवतीभ्यां कदाचिदन्यत्र प्रत्यक्षीकृतमिदम् ?

उभे—अणेअसो। **[अनेकशः।]**

राजा—(सहर्षमात्मगतम्) तत् किं खल्विदानीं पूर्णमात्मनो मनोरथं नाभिनन्दामि ? (इति बालकं परिष्वजते।)

द्वितीया—सुव्वदे! एहि इमं वुत्तंतं णिअमवावडाए सउंतलाए णिवेदेम्ह। **[सुव्रते! एहि इमं वृत्तान्तं नियमव्यापृतायाः शकुन्तलाया निवेदयावः।]** (इति निष्क्रान्ते)

स्वयमेव च, वर्जयित्वा=त्यक्त्वा, अपरः=अन्यः कश्चिदपि, भूमिपतितां=भूलुण्ठितां, न गृह्णाति=नैव स्पृशति।

राजा—अथेति प्रश्ने, गृह्णाति=यद्यन्यः कश्चिद् गृह्णाति तर्हि किं स्याद् ?

प्रथमा—ततः=तदा, सर्पो भूत्वा एषोषधीति शेषः, तं=जनं, दशति।

राजा—अत्रभवतीभ्यां=युवाभ्याम्, कदाचित्=कदापि, अन्यत्र=मदितरस्मिन् ग्रहीतरि, इदं=रक्षाकाण्डस्य सर्पभावेन दंशनम्, प्रत्यक्षीकृतम्=दृष्टम्।

उभे—अनेकशः=बहुशः।

राजा—(सहर्षमात्मगतम्=प्रसन्नतापूर्वकं स्वगतम्) तत्=सर्वविधसंशयच्छेदात्, उक्तरूप-हेतुप्रचयेन, पूर्णम्=स्त्रीपुत्रलाभेन सफलम्, आत्मनः=स्वस्य, मनोरथम्=अभिवाञ्छितम्, नाभिनन्दामि=लक्ष्यीकृत्य नानन्दितो भवामि। किमिति प्रश्ने, खल्विति निश्चयेन। (इति=इत्युक्त्वा, बालकं, परिष्वजते=आलिङ्गति।)

राजा—यदि कोई दूसरा उठा ले तो ?

प्रथमा—तो यह सर्प बनकर उसे डस लेगा।

राजा—क्या आप दोनों ने कभी यह घटित होते हुए देखा है ?

दोनों—बहुत बार।

राजा—**(हर्ष के साथ स्वगत)** तो इस स्थिति में मैं क्यों अपने सफल होने वाले मनोरथ का अभिनन्दन न करूँ। **(ऐसा कहकर बालक को आलिङ्गन करता है।)**

द्वितीया—सुव्रते! चलो यह वृत्तान्त व्रतनिरत शकुन्तला को भी सुना दें।

(दोनों का प्रस्थान)

The king—If some one takes it up?

First ascetic woman—Then becoming a snake, it bites him.

The king—Has its transformation witnessed by your ladyship at any time?

Both—Several times.

The king—*(With joy to himsefl)* Why realy do I not hail my hearts desire, though it is fulfilled? *(Embraces the boy)*

Second ascetic woman—Survate! come. We shall report this

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालः—मुंच मं मुंच मं, अंबाए सआसं गमिस्सं। [**मुञ्च माम् मुञ्च माम्, अम्बायाः सकाशं गमिष्यामि।**]

राजा—पुत्र! मयैव सह मातरमभिनन्दिष्यसि।

बालः—दुस्संतो मम तादो, ण क्खु तुमं। [**दुष्यन्तो मम तातः, न खलु त्वम्।**]

राजा—एष विवाद एव मां प्रत्याययति।

(ततः प्रविशत्येकवेणीधरा शकुन्तला।)

शकुन्तला—(सवितर्कम्) विआरकाले वि पइदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसंसो अत्तणो भाअधेएसुं। अधवा जधा मिस्सकेसीए मे आचक्खिदं तधा संभावी-

---

द्वितीया—सुव्रते, एहि=मया सह आगच्छ, इमं वृत्तान्तं—इमं=भूमिपतितं रक्षाकाण्डं गृह्णतोऽपि राज्ञः तत्कर्तृकसर्परूपेणादंशनम्, वृत्तान्तं=वार्ताम्, नियमव्यापृतायाः=पतिव्रतधर्मपालन-निरतायाः शकुन्तलायाः, समीपे, निवेदयावः=विज्ञापयावः। (इति=इत्युक्त्वा, निष्क्रान्ते=निर्गते।)

बालः—मुञ्च माम्=माम् परित्यज, अम्बायाः=मातुः शकुन्तलायाः, सकाशं=समीपं, गमिष्यामि।

राजा—पुत्र=वत्स! मयैव सह=मया साकमेव, मातरं=जननीम्, अभिनन्दिष्यसि=अभिनन्दनं करिष्यसि, प्रणामं करिष्यसि।

बालः—दुष्यन्तः=तन्नाम्ना प्रसिद्धः राजा, मम=सर्वदमनस्य, तातः=जनकः, न खलु त्वं मे पिता।

राजा—एष विवादः=विरुद्धो वादः, एव, माम्=दुष्यन्तम्, प्रत्याययति=विश्वासं जनयति (त्वं मे पुत्र इति)।

(ततः=तदनन्तरम्, एकवेणीधरा=विरहचिह्नरूपा एकवेणीधरा, शकुन्तला, प्रविशति=रङ्गे आगच्छति।)

बालक—मुझे छोड़ दो, मुझे छोड़ दो। मैं अपनी माँ के पास जाऊँगा।

राजा—पुत्र! मेरे साथ ही माँ के पास चलकर उनका अभिनन्दन करना।

बालक—मेरे पिता दुष्यन्त हैं, तुम नहीं हो।

राजा—यह विवाद ही तो मुझे विश्वास दिलाता है।

(इसके पश्चात् एक वेणी धारण किये शकुन्तला का प्रवेश)

---

incident to dear Śakuntalā, who is engaged in the observance of her vows. *(Exeunt)*

Boy—Release me, release me. I shall go to my mother.

The king—Son! even along with me you will greet your mother.

Boy—My father indeed is Duśyanta, not you.

The king—This contradiction itself convinces me.

(Then enter Śakuntalā having her hair tied is one mass)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अदि एदं। [**विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्य ओषधिं श्रुत्वा न मे आशंसा आत्मनो भागधेयेषु। अथवा यथा मिश्रकेश्या मे आख्यातं तथा सम्भाव्यते एतत्।**] (इति परिक्रामति)

राजा—(शकुन्तलां विलोक्य सहर्षखेदम्) अये! सेयमत्रभवती शकुन्तला—

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्त्ति॥ २१॥

शकुन्तला—(सवितर्कम्=तर्काभिनयेन सह) विकारकालेऽपि=विकारयोग्यकालेऽपि, प्रकृतिस्थाम्=अविकाराम्, सर्वदमनस्य=स्वपुत्रस्य, ओषधिम्=अपराजितां नाम सुरमहौषधीम्, श्रुत्वा= आकर्ण्य, मे=मम, आत्मनः=स्वस्य, भागधेयेषु=भाग्येषु, आशंसा न=न प्रत्याशाः (आशा नैव जायते)। अथवा—यथा=येन प्रकारेण, मे=मम समीपे, मिश्रकेश्या, एतत्=भर्तृस्वीकरणम्, आख्यातं= वर्णितम्, तत् यथा=तेनैव प्रकारेण, सम्भाव्यते। (इति परिक्रामति=राज्ञोऽन्तिकं ·. नुं पादसञ्चारं करोति।)

राजा—(शकुन्तलाम्=स्वपत्नीं, विलोक्य=दृष्ट्वा, हर्षखेदाभ्यां सह वर्तते इति तद्यथा स्यात्तथा सहर्षखेदम्=प्रियाप्राप्तिपरकहर्षं तथा स्वकृत्ये खेदम् इत्युभाभ्यां सहितम्) अये= इति सम्भ्रमे, सा इयम्= पूर्वपरिणीता पश्चात् भर्त्सिता (प्रत्याख्याता), अत्रभवती=मान्या, शकुन्तला= कण्वदुहिता।

अन्वयः—परिधूसरे वसने वसाना नियमक्षाममुखी धृतैकवेणिः शुद्धशीला अतिनिष्करुणस्य मम दीर्घं विरहव्रतं बिभर्ति॥ २१॥

शकुन्तला—(**वितर्कपूर्वक**) यद्यपि सर्वदमन की औषधि गिरने और उसके उठाये जाने की बात मैंने सुनी है तथापि मुझे अपने भाग्य से यह आशा नहीं है कि वे स्वयं यहाँ आये होंगे? किन्तु जैसा कि मिश्रकेशी ने कहा था, वह यदि सच है तो यह भी सम्भव है। (**ऐसा कहकर आगे बढ़ती है।**)

राजा—(**शकुन्तला को देखकर हर्ष और खेद के साथ**) अरे! यही वे मान्या शकुन्तला हैं—

जिन्होंने मलिन वस्त्र धारण कर रखे हैं, व्रतोपवासादि के कारण जिनका मुख कुम्हला गया है तथा जो मात्र एक ही वेणी धारण किये हुए हैं। अतः ज्ञात होता है कि ये मुझ निर्दयी के लिए चिरकाल से विरहव्रत का पालन कर रही हैं॥ २१॥

Śakuntalā—Having heard that Sarvadamana's herb remained in its natural condition even at the tme of transformation, I had no hope in my fortunes or as was told by Miśrakeśī, so this is possible.

The king—*(Observing Śakuntalā)* Oh! this is her ladyship Śakuntalā—who here—

Wearing a pair of dirty (dusky) garments, with her face emaciated through severe vows, bearing a single braid of hair and

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(पश्चात्तापविवर्णं राजानं दृष्ट्वा सवितर्कम्) ण क्खु अज्जउत्तो अअं, ता को एसो किदरक्खामंगलं दारअं मे गत्तसंसग्गेण दूसेदि। [**न खलु आर्यपुत्रोऽयम्, तत् क एषः कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति।**]

बालः—(मातरमुपगम्य) अंब! को एसो मं पुत्तकेत्ति ससिणेहं आलिङ्गदि। [**अम्ब! क एष मां पुत्रकेति सस्नेहमालिङ्गति।**]

वसने इति। परिधूसरे=संस्काराद्यभावान्मलिने, वसने=वस्त्रे, वसाना=परिदधाना, नियमैः=व्रतोपवासादिभिः, क्षामं=क्षीणं, मुखं यस्याः सा नियमक्षाममुखी=क्षीणानना, (शिरसि) धृता एका वेणिर्यया सा धृतैकवेणिः=मात्रैकवेणीं दधाना, शुद्धं=पवित्रं, शीलं=चरित्रं, यस्याः सा शुद्धशीला, अतिनिष्करुणस्य=सुतरां क्रूरस्य, मम=दुष्यन्तस्य, दीर्घं=चिरकालव्यापि, विरहव्रतं=नियोगनियमं, बिभर्त्ति=पालयति। अत्र काव्यलिङ्गस्वभावोक्त्यलङ्कारौ। औपच्छन्दसिकं वृत्तम्॥ २१॥

भावार्थः—स्वगर्हितकार्य्ये खेदं प्रकटयन् कथयति राजा दुष्यन्तः-सेयं पूर्वं परिणीता मम जाया शकुन्तला या सम्प्रति संस्काराद्यभावात् मलिनवस्त्राणि परिदधति, व्रतोपवासादिभिः क्षीणानना अस्ति। प्रोषितपतिकानां कृते वैधव्यकेशधारणप्रतिषेधात् शिरसि मात्रैकवेणीं धारयति, अत एव ज्ञायते यत् शुद्धशीला सा सुतरां क्रूरस्य मम दुष्यन्तस्य कृते चिरकालव्यापि विरहव्रतं बिभर्त्ति इति॥ २१॥

शकुन्तला—(पश्चात्तापेन=स्वप्रत्याख्यानजनितानुतापेन, विवर्णं=मलिनाकृतिं, पश्चात्ताप-विवर्णं, राजानं=दुष्यन्तं, दृष्ट्वा=अवलोक्य, सवितर्कम्) न खलु आर्यपुत्रोऽयम्=स्वामी दुष्यन्तः, तत्=तदा, क एषः=कोऽयं जनः। कृतं रक्षायै मङ्गलं यस्य तं कृतरक्षामङ्गलम्, दारकं=पुत्रं, मे=मम, गात्रसंसर्गेण=आलिङ्गनेन, दूषयति=अपवित्रतां नयति।

बालः—(मातरं=शकुन्तलां, उपगम्य=प्राप्य) अम्ब=मातः! क एषः=अपरिचितः कश्चिदेषः, मां=सर्वदमनम्, पुत्रकेति सम्बुद्ध्य, सस्नेहम्=स्नेहपूर्वकम्, आलिङ्गति=परिष्वजति।

शकुन्तला—(पश्चात्ताप के कारण विवर्ण राजा को देखकर वितर्कपूर्वक) नहीं, ये आर्यपुत्र नहीं हैं। तब ये कौन हैं जो रक्षासूत्रधारी मेरे पुत्र को अपने शारीरिक स्पर्श से दूषित कर रहे हैं।

बालक—माँ! यह कौन है ? जो पुत्र कहकर प्यार करता है ?

---

pure character, undergoes the long vow of seperation from me, who was excessively suthless (cruel) to her. (21)

***Śakuntalā**—(Observing the king who had turned pale through repentance, with suspition)* No, certainly this is not my lord. Who then is this that, with the contact of his body is now contaminating (polluting) my boy, protected by an auspicious amulet.

***Boy**—(Approaching his mother)* Mother, who is this? Who embraces me, saying O' my son.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—प्रिये! क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम्। तदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानमिच्छामि।

शकुन्तला—(स्वगतम्) हिअअ! समस्सस समस्सस। पहरिअ परिच्चत्तमच्छरेण अणुकंपिदम्हि देव्वेण। अज्जउत्तो एव्व एसो। **[हृदय! समाश्वसिहि समाश्वसिहि। प्रहृत्य परित्यक्तमत्सरेण अनुकम्पिताऽस्मि दैवेन। आर्यपुत्र एव एषः।]**

राजा—प्रिये!

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि!।
उपरागान्ते शशिनः समुपगता रोहिणी योगम्॥ २२॥

राजा—प्रिये! मे=मम, त्वयि=तवोपरि, क्रौर्यमपि=प्रत्याख्यानमपि (क्रूरताप्रदर्शनमपि), प्रयुक्तम्=कृतम्, तदपि अनुकूलः परिणामः=पश्चात्तापलक्षणः, यस्य तत् अनुकूलपरिणामं, संवृत्तम्=जातम्। तत्=तस्मात्, अहम्=दुष्यन्तः, इदानीम्=सम्प्रति, त्वया=भवत्या, प्रत्यभिज्ञातम् आत्मानम्='आर्यपुत्र एवायमि'ति परिचितं, इच्छामि=कामये।

शकुन्तला—(स्वगतम्=आत्मगतम्, अनतिस्पष्टम्) हृदय! समाश्वसिहि समाश्वसिहि= धैर्यमवलम्बस्व। प्रहृत्य=प्रहारं कृत्वा, परित्यक्तः=परिहृतः, मत्सरः=द्वेषः, येन तेन परित्यक्त-मत्सरेण, दैवेन=विधिना, अनुकम्पिताऽस्मि=अनुग्रहपात्रीकृता अस्मि। एषः=सम्मुखस्थः, आर्यपुत्र एव=मम भर्त्ता एव।

राजा—प्रिये!

अन्वयः—हे सुमुखि! दिष्ट्या स्मृतिभिन्नमोहतमसः मे प्रमुखे स्थितासि। रोहिणी उपरागान्ते शशिनः योगं समुपगता॥ २२॥

स्मृतीति। हे सुमुखि! दिष्ट्या=भाग्येन, स्मृत्या=पूर्ववृत्तान्तजातस्मरणेन, भिन्नं=खण्डितं, मोह एव तमः=अन्धकारः, मोहः तमः=राहुरिव वा यस्य तस्य स्मृतिभिन्नमोहतमसः, मे=मम

राजा—प्रिये! यद्यपि मैंने तुम्हारे साथ ऐसी क्रूरता की थी तथापि वह आज हमारे लिए अनुकूल ही सिद्ध हुई। इसलिए अब मैं यही चाहता हूँ कि तुम मुझे पहचान लो।

शकुन्तला—(**मन में**) हृदय! धैर्य धरो, धैर्य धरो। विधाता ने पहले तो मुझ पर प्रहार किया किन्तु बाद में द्वेषभाव त्याग कर उसने मुझ पर दया की है। ये आर्यपुत्र ही हैं।

राजा—पिये!

हे सुमुखि! भाग्यवश पूर्व समय की सब बातें याद आ गयीं और मेरे अज्ञान का

The king—Beloved! even cruelty, practised by me towards you, has come to have a favourable conclusion in as much as I now see myself recognized by you.

Śakuntalā—*(To herself)* Heart! take courage, take courage. I have been pitied by fate, that has left its malice. this is certainly my lord.

The king—Beloved!

Fortunately you stand before me, whose darkness in the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(सहर्षम्) जअदु जअदु अज्जउत्तो। [**जयतु जयतु आर्यपुत्रः।**] (इत्यर्द्धोक्ते बाष्पसन्नकण्ठी विरमति।)

राजा—प्रिये!

बाष्पेण प्रतिरुद्धेऽपि जयशब्दे जितं मया।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम्॥ २३॥

दुष्यन्तस्य, प्रमुखे=सम्मुखे, स्थितासि=तिष्ठसि। रोहिणी=चन्द्रपत्नी (तारिका), उपरागान्ते=राहुग्रासावसाने, शशिनः=चन्द्रमसः, योगम्=सम्मिलनम्, समुपगता=सम्प्राप्ता। अत्र दृष्टान्तोऽलङ्कारः। आर्या जातिः॥ २२॥

भावार्थः—यथा उपरागावसाने शशिना सह रोहिण्या मिलनमिव विस्मरणावसाने मया सह तव मिलनं जातमिति। तयोर्मिलनमिवावयोर्मिलनमतीव रम्यतरमिति भावः॥ २२॥

शकुन्तला—(सहर्षम्) जयतु, जयतु आर्यपुत्रः=मदीयस्वामिनो जयोऽस्तु। (इति=एवं, अर्धोक्ते=अपरिसमाप्तस्वकीयकथने, बाष्पेण=अश्रुभारेण, सन्नः=अवरुद्धः, कण्ठो यस्याः सा बाष्पसन्नकण्ठी, विरमति=अन्यस्माद् वक्तव्यान्निवर्तते।)

राजा—प्रिये=वल्लभे!

अन्वयः—बाष्पेण जयशब्दे प्रतिरुद्धेऽपि मया जितम्। यत् असंस्कारपाटलोष्ठपुटं ते मुखं दृष्टम्॥ २३॥

बाष्पेणेति। बाष्पेण=अश्रुभारेण, जयशब्दे=जयतु जयतु आर्यपुत्रः इति शब्दे, प्रतिरुद्धेऽपि=निरुद्धेऽपि, मया जितम्=ममोत्कर्षोऽभूत्। यत्=यस्मात्, असंस्कारेण=संस्काराभावेन, पाटलः= श्वेतरक्तः, ओष्ठपुटो यस्य तत् असंस्कारपाटलोष्ठपुटम्=अकृत्रिममनोहरम्, ते=तव,

---

अन्धकार दूर हो गया। इस समय तुम मेरे सामने खड़ी हो। हमारा यह मिलन उसी प्रकार है जैसे ग्रहण के पश्चात् रोहिणी और चन्द्रमा का होता है॥ २२॥

शकुन्तला—(**हर्षपूर्वक**) आर्यपुत्र की जय हो! जय हो! (**केवल आधी बात कह कर गला भर आने से चुप हो जाती है।**)

राजा—प्रिये! यद्यपि अश्रुवेग ने जय शब्द को रोक लिया है तथापि मैंने जयलाभ कर ही लिया है; क्योंकि मुझे आज संस्कारविहीन रक्त-श्वेतवर्ण के तुम्हारे ओठों को देखने का अवसर मिल गया है॥ २२॥

---

form of delusion is dispelled by recollection. O' lovely faced one! at the end of the eclips Rohiṇī has approached union with the moon. (22)

***Śakuntalā*—**May my lord be victorious, be victorious.

(Stops with choaking throat, when half said)

***The king*—**O' beautcous one!

I have become victorious, though the word 'victory' was impeded by tears, in as much as I have seen your face with its lips pale-red through want of decoration. (23)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालः—अंब को एसो। **[अम्ब! क एषः ।]**

शकुन्तला—भाअधेआइं पुच्छ। **[भागधेयानि पृच्छ।]**

राजा—

सुतनु! हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत्।
प्रबलतमसामेवं प्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥ २४॥

(इति पादयोः पतति)

मुखम्=आननम्, दृष्टम्। अत्र जयशब्दे प्रतिषिद्धेऽपि जितमिति विरोधाभासालङ्कारः। तथा जितं प्रति परार्द्धवाक्यार्थस्य हेतुत्वेनोपपादनात् काव्यलिङ्गमपि॥ २३॥

भावार्थः—तव अकृत्रिममनोहराननस्य दर्शनेन विरहनाशात् मया जितमिति भावः॥ २३॥

बालः—अम्ब=मातः! क एषः=कोऽयम्?

शकुन्तला—भागधेयानि=अदृष्टानि, पृच्छत=जिज्ञासस्व। (येषां विडम्बनया तातनयोरपि नास्ति परिचय इति भावः।)

राजा—

अन्वयः—सुतनु! ते हृदयात् प्रत्यादेशव्यलीकम् अपैतु तदा मे मनसः किमपि बलवान् सम्मोहः अभूत्। हि प्रबलतमसां शुभेषु वृत्तयः एवम्प्रायाः अन्धः शिरसि क्षिप्तां स्रजमपि अहिशङ्कया धुनोति॥ २४॥

सुतन्विति। हे सुतनु=शोभनाङ्गि! ते=तव, हृदयात्, प्रत्यादेशेन=मत्कृतनिराकरणेन, व्यलीकं=पीडा, प्रत्यादेशव्यलीकम्, अपैतु=अपसरतु, तदा=प्रत्याख्यानकाले, मे=मम, मनसः, किमपि=अनिर्वचनीयम् (केनापि हेतुना वा), बलवान्=अधिकः, सम्मोहः=भ्रमः, अभूत्=जातः। हि=तत्र हि, प्रबलं=बलवत्, तमः=सम्मोहोऽन्धकारश्च, येषां तेषां प्रबलतमसां जनानाम्, शुभेषु=श्रेयःसाधनेषु विषयेषु, वृत्तयः=प्रवृत्तयः, एवम्प्रायाः=बाहुल्येनेत्थम्भूताः (निराकरणरूपा) भवन्ति। (यथा) अन्धः=चक्षुर्भ्यां विहीनो जनः, शिरसि=मस्तके, क्षिप्ताम्=अन्येनार्पिताम्, स्रजमपि=पुष्पमालामपि, अहिशङ्कया=सर्पभ्रान्त्या, धुनोति=कम्पयति (शिरःकम्पनेन कम्पयित्वाऽधः

बालक—माँ! यह कौन है?

शकुन्तला—अपने भाग्य से पूछ।

राजा—हे सुन्दरी! अब तुम उस समय की त्याग सम्बन्धी बातें भूल जाओ, क्योंकि उस समय मेरा मन प्रबल मोहजनित अज्ञानान्धकार से पूर्ण था। अत्यन्त अज्ञानी की कल्याण कामना करनेवालों को ऐसा ही व्यवहार करना चाहिए। जैसे यदि किसी अन्धे के गले में

Mother—Mother! who is this?

Śakuntalā—(Child!) ask your fate.

The king—Fair one! let the grief of repudiation go away from your heart. Some how there was a mighty infatuation in my mind then. For such, for the most part, are the tendencies towards

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—उत्थेदु अज्जउत्तो। णूणं मे सुहप्पडिबंधअं पुराकिदं तेसुं दिअसेसुं परिणाममुहं आसि; जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो। **[उत्तिष्ठतु आर्य्यपुत्रः। नूनं मे सुखप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणाममुखमासीत्; येन सानुक्रोशोऽपि आर्य्यपुत्रो मयि विरसः संवृत्तः।]**

(राजा उत्तिष्ठति)

क्षिपतीत्यर्थः)। अत्र वाक्यार्थगतकाव्यलिङ्गम्, अर्थान्तरन्यासः दृष्टान्तश्चालङ्कारः। हरिणी वृत्तम्॥ २४॥

भावार्थः—इदं मे त्वयि निवेदनं यत् तदा सम्मोहात् प्रत्याख्यानेन पीडा दत्ता न तु कामतः, अतस्तदपराधो भवत्या क्षन्तव्यः। हि प्रबलतमसां जनानां श्रेयःसाधनेषु विषयेषु प्रवृत्तयः बाहुल्येनेत्थम्भूता भवन्ति। यथा अन्धः शिरसि क्षिप्तां पुष्पमाला सर्पभ्रान्त्या शिरःकम्पनेन कम्पयित्वा अधः पातुमिच्छति तथैव प्रबलतमसो जनस्य शुभेषु विपरीतवृत्तयो भवन्ति॥ २४॥

(इति पादयोः पतति)

शकुन्तला—(उत्तिष्ठतु=आत्मानमुत्थापयतु, आर्यपुत्रः=भर्त्ता) नूनं=निश्चितम्, मे=मम, सुखस्य प्रतिबन्धकम्=व्याघातकम् (दुःखोत्पादकम्), पुराकृतं=पूर्वजन्मानुष्ठितं दुष्कृतमेवेति शेषः, तेषु=अतीतेषु, दिवसेषु=दिनेषु (निराकरणावधिकारकदिनेषु), परिणाममुखम्=परिपाकाभिमुखम् (दुःखजननप्रवृत्तम्) आसीत्। येन=हेतुना, सानुक्रोशोऽपि=मयि अनुरागातिशयेन सदयोऽपि, आर्य्यपुत्रः=भवान्, विगतः रसः रागः=अनुरागः, यस्य सः विरसः, संवृत्तः=सञ्जातः।

(राजा उत्तिष्ठति=शकुन्तलायाः पादतलादिति शेषः।)

सहसा पुष्पमाला डाल दी जाय तो वह उसे साँप समझकर फेंक देगा; वैसी ही प्रवृत्ति मोहान्ध व्यक्ति की शुभ कार्यों में समझनी चाहिए॥ २४॥

(ऐसा कहकर पाँवों पर गिरता है।)

शकुन्तला—आर्यपुत्र! उठिए। उस समय किसी पूर्वजन्मकृत पाप से मेरे सुखभोग में व्याघात उत्पन्न हो गया था, जिसके कारण आप जैसा सहृदय प्रेमी भी मुझसे उदासीन हो गया था।

(राजा उठता है)

---

auspicious matters, of those in whom darkness is supreme; a blind man shakes off even a garland thrown on his head, feeling it to be a serpent. (24)

(Falls at her feet.)

Śakuntalā—Let my lord rise up. Certainly my evil doing in a former existence, obstrucing the operation of my good deeds, was in those days drawing towards fruition (enjoyment), on account of which my lord, though possessed of compassion become unfeeling towards me.

(The king rises up)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—अध कथं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो। **[अथ कथमार्यपुत्रेण स्मृतो दुःखभागी अयं जनः।]**

राजा—उद्धृतविषादशल्यः कथयिष्यामि।

मोहान्मया सुतनु! पूर्वमुपेक्षितस्ते
यो बाष्पबिन्दुरधरं परिबाधमानः।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
कान्ते! प्रमृज्य विगतानुशयो भवामि॥ २५॥

(इति यथोक्तं करोति)

शकुन्तला—अथेति प्रश्ने, दुःखभागी=दुःखैकमात्रभोगी, अयं जनः=अहम्, आर्य्यपुत्रेण=भवता, कथं स्मृतः=केन हेतुना स्मृतिपथमानीतः।

राजा—उद्धृतम्=उन्मूलितं, विषादः=शोकः, शल्यं=शङ्कुरिव येन सः उद्धृतविषादशल्यः=अपनीतशोकशङ्कुः सन्, कथयिष्यामि=वक्ष्यामि।

अन्वयः—हे सुतनु! मया अधरं परिबाधमानः ते यः बाष्पबिन्दुः पूर्वं मोहात् उपेक्षितः कान्ते अद्य आकुटिलपक्ष्मविलग्नं तं प्रमृज्य तावत् विगतानुशयः भवामि॥ २५॥

मोहादिति। हे सुतनु=हे शोभनाङ्गि! मया=दुष्यन्तेन, अधरम्=अधरोष्ठम्, परितः=सर्वतः, बाधमानः=पीडयन्, परिबाधमानः, ते=तव, यः बाष्पबिन्दुः=अश्रुकणः, पूर्वम्=प्रत्याख्यानकाले, मोहात्=अज्ञानात्, उपेक्षितः=न प्रोञ्छितः, न परिमार्जितः, हे कान्ते! अद्य=सम्प्रति, आकुटिलेषु=ईषद्वक्रेषु, पक्ष्मसु=नेत्रलोमसु, विलग्नम्=संसक्तम्, आकुटिलपक्ष्मविलग्नम्, तम्=अश्रुबिन्दुम्, प्रमृज्य=परिमार्ज्य, तावत्=परिप्रोञ्छ्यैव, विगतानुशयः=विनष्टानुतापः (उद्धृतविषादशल्यः), भवामि। अत्र विशेषोक्तिः काव्यलिङ्गं चालङ्कारौ। वसन्ततिलकं वृत्तम्॥ २५॥

शकुन्तला—कहिए! आर्यपुत्र ने इस दुःखिया को कैसे याद किया?

राजा—जब विषाद रूपी काँटा निकल जायेगा तभी वे सब बातें बताऊँगा।

उस समय मोहवश ओठों को सताने वाले जिन अश्रुकणों की मैंने उपेक्षा की थी, हे कान्ते! कुछ तिरछी पलकों में उलझे हुए उन अश्रुकणों को आज मैं अपने हाथों से पोंछकर अनुतापरहित हो जाऊँगा॥ २५॥

(ऐसा कहकर आँसू पोछता है।)

Śakuntalā—How then was this person, doomed to misery, remembered by my lord?

The king—With the dart of grief extracted, I shall tell you.

Having first wiped off to the drop of tear, which paining your lower lip, was, O' beautious one! formerly disregarded by me through infatuation, and which now is clinging to your alightly curved eye-lashes, I shall, O' beloved of mine! be free from remorse or repentance . (25)

(Does as said)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(प्रमृष्टबाष्पा अङ्गुरीयकं विलोक्य) अज्जउत्त! तं एदं अंगुलीअअं?! **[आर्यपुत्र! तदेतद् अङ्गुलीयकम्?]**

राजा—अथ किम्! अस्याद्भुतोपलम्भान्मया स्मृतिरुपलब्धा।

शकुन्तला—विसमं किदं क्खु इमिणा, जं तदा अज्जउत्तस्स पच्चाअणकाले दुल्लहं आसि। **[विषमं कृतं खल्वनेन, यत् तदा आर्यपुत्रस्य प्रत्यायनकाले दुर्लभमासीत्!]**

राजा—तेन हि ऋतुसमागमचिह्नं प्रतिपद्यतां लताकुसुमम्।

भावार्थः—पूर्वं मोहात् उपेक्षितबाष्पबिन्दूनद्य प्रोञ्छ्य उद्धृतविषादशल्यो भवामि इति भावः॥ २५॥

(इति=इत्युक्त्वा, तथा करोति=अश्रुबिन्दून् परिमार्जयति।)

शकुन्तला—(प्रमृष्टः=दुष्यन्तेन प्रोञ्छितः, बाष्पः=नेत्रजलं, यस्याः सा प्रमृष्टबाष्पा, अङ्गुरीयकं=कराङ्गुलीयम्, विलोक्य=दृष्ट्वा) आर्यपुत्र! तदेतदङ्गुरीयकम्=या शचीतीर्थे क्वापि पतिता तथा च यदपायान्ममेयं दुर्दशेति भावः।

राजा—अथ किम्—इदमेकमव्ययपदमङ्गीकारार्थकम्। अस्य=अङ्गुरीयकस्य, अद्भुतोपलम्भात्=आश्चर्यरूपाल्लाभात्, मया=दुष्यन्तेन, स्मृतिः=परिणीतारूपेण तव स्मरणम्, उपलब्धा=प्राप्ता।

शकुन्तला—अनेन=अङ्गुलीयकेन, विषमं=दारुणं, कृतं=विहितं, खल्विति निश्चये, यत्=यस्मात्, तदा, आर्यपुत्रस्य=भवतः, प्रत्यायनकाले=विश्वासोत्पादनसमये, दुर्लभम्=अनासन्नम् (दुष्प्रापं) आसीत्।

राजा—तेन=इदानीमासादितत्वेन, ऋतोः=वसन्तस्य (मम), यः समागमः=सम्मेलनं,

---

शकुन्तला—(**आँसू पुँछ जाने पर अँगूठी देखकर**) आर्य्यपुत्र! यह वही अँगूठी है।

राजा—और क्या? एक विचित्र ढंग से इसके मिलने पर ही तो मुझे तुम्हारी याद आयी।

शकुन्तला—इसने सत्य ही बड़ी गड़बड़ी की जो उस समय आपको विश्वास दिलाने के लिए नहीं मिली।

राजा—यदि ऐसा है तो ऋतु के साथ समागम होने के प्रतीकस्वरूप लता इस पुष्प को धारण करें।

***Śakuntalā**—(Seeing the ring after wiped of tears)* My lord! this is that ring?

The king—Really the strange acquisition of this ring, I recollected the memories of my marriage with you or recollection was obtained.

Śakuntalā—An evil was done by it, in as much as it was difficult to obtain than at the time of convincing my lord.

The king—Then, let the creeper receive the flower as a sign of its union with the spring season.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—ण से विस्ससेमि, अज्जउत्तो ज्जेव णं धारेदु। **[नास्य विश्वसिमि, आर्यपुत्र एव एनं धारयतु।]**

(ततः प्रविशति मातलिः)

मातलिः—दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन च आयुष्मान् वर्द्धते।

राजा—सुहृत्सम्पादितत्वात् साधुतरफलो मे मनोरथः। मातले! न खलु विदितोऽयमाखण्डलस्यार्थः?

मातलिः—(सस्मितम्) किमीश्वराणां परोक्षम्। एहि भगवान् मारीचस्ते दर्शनमिच्छति।

तस्य चिह्नं=सूचकम्? ऋतुसमागमचिह्नं, कुसुमं=स्वपुष्पम् (अङ्गुरीयकम्), लता=वल्ली (लतेव तन्वङ्गी त्वम्), प्रतिपद्यताम्=लभताम्। (यथा वल्ली वसन्तसमागमचिह्नभूतं स्वपुष्पं धारयति तथा त्वमपि मत्समागमचिह्नभूतमिदमङ्गुरीयकं पुनर्धारयेति भावः।)

शकुन्तला—अस्य=अङ्गुरीयकस्य सम्बन्धे, न विश्वसिमि=न विश्वासं करोमि। आर्य्यपुत्र एव=भवानेव, एनम्=अङ्गुरीयकम्, धारयतु=अङ्गुलौ स्थापयतु।

(ततः=तदनन्तरम्, मातलिः=देवराजसारथिः, प्रविशति=रङ्गे समायाति।)

मातलिः—दिष्ट्या=इत्यानन्दे, धर्मपत्नीसमागमेन=सम्मेलनेन, च=तथा, पुत्रस्य मुखदर्शनेन, आयुष्मान्=भवान्, वर्द्धते=अभ्युदेति।

राजा—सुहृदा=सख्या, भवतः, सम्पादितत्वात्=साधितत्वात्, सुहृत्सम्पादितत्वात्, मे=मम, मनोरथः=अभिलाषः, साधुतरम्=अतीवोत्कृष्टं, फलं यस्य सः साधुतरफलः, जात इति शेषः। मातले! अयमर्थः=मम पुत्र-पत्नीसमागमरूपो विषयः, आखण्डलस्य=महेन्द्रस्य, न खलु विदितः=इन्द्रेण नैवावगतः (किम्)?

शकुन्तला—मुझे इसका विश्वास नहीं है। आर्यपुत्र ही इसे धारण करें।

(इसके पश्चात् मातलि का प्रवेश)

मातलि—सौभाग्य से धर्मपत्नी से मिलने तथा पुत्र का मुख देखने से आयुष्मान् की अभिवृद्धि हुई है।

राजा—आप जैसे मित्र की सहायता से मुझे सर्वोत्कृष्ट फल की प्राप्ति हुई है। मातलि! मुझे इन्द्र का यह तात्पर्य नहीं मालूम था।

मातलि—**(मुस्कराकर)** अणिमादि सिद्धियों के स्वामी से भला कोई बात छिपी रह सकती है? चलिए भगवान् कश्यप आपको देखना चाहते हैं।

Śakuntalā—I trust it not. Let my lord himself wear it.

(Then enter Mātalī)

Mātali—Fortunately the long-lived one thrives by union with his lawful wife and by seeing his son's face.

The king—My desire has come to attain a sweet fruit. *Mātalī*! (I hope) this account may really not be known to Indra?

Mātali—*(With a smile)* What is out of sight to the lords

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—प्रिये ! अवलम्ब्यतां पुत्रः, त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि।

शकुन्तला—लज्जेमि क्खु अज्जउत्तेण सद्धं गुरुअणसमीवं गंतुम्। [लज्जे खलु आर्य्यपुत्रेण सार्द्धं गुरुजनसमीपं गन्तुम्।]

राजा—आचरितव्यमेतदभ्युदयकालेषु; तदेहि तावत्।

(इति सर्वे परिक्रामन्ति)

(ततः प्रविशत्यदित्या सहासनोपविष्टो मारीचः)

मातलिः—(सस्मितम्=सेषद्धासम्) ईश्वराणाम्=अणिमाद्यैश्वर्यशालिनाम्, किं=वस्तु, परोक्षम्=अगोचरम् (न किमपीत्यर्थः), एहि=आगच्छ, भगवान् मारीचः=कश्यपः, ते=तव, दर्शनम्=साक्षात्कारं, इच्छति=आकांक्षति।

राजा—प्रिये! पुत्रः=सुतः, अवलम्ब्यताम्=अङ्कमारोप्यताम्, त्वां=भवतीम्, पुरस्कृत्य=अग्रेसरीकृत्य, भगवन्तम्=कश्यपम्, द्रष्टुम्=अवलोकयितुम्, इच्छामि=वाञ्छामि।

शकुन्तला—आर्य्यपुत्रेण सार्द्धं=भवता सह, गुरुजनसमीपं गन्तुं=गुरुजनपार्श्वे प्रयातुं, लज्जे=लज्जामनुभवामि, खल्विति निश्चयेन।

राजा—अभ्युदयकालेषु=माङ्गलिकेषु अवसरेषु, एतत्=वन्दनाद्यर्थं गुरुजनसमीपे स्त्रीपुत्रैः सह भर्तुर्गमनम्, आचरितव्यम्=विधातव्यम् (अत एव लज्जाकरणमनुचितम्)। तत्=तस्मात्, तावत् एहि=आगच्छ। (इति सर्वे परिक्रामन्ति=पादन्यासं कुर्वन्ति।)

(ततः=तदनन्तरम्, प्रविशति=रङ्गे समायाति, अदित्या=स्वपत्न्या सह, आसनोपविष्टः=एकासनस्थः, मारीचः=मरीचिपुत्रः कश्यपः।)

राजा—प्रिये! बच्चे को सम्हालो, तुम्हें आगे करके ही मैं भगवान् कश्यप के दर्शन करना चाहता हूँ।

शकुन्तला—आर्यपुत्र के साथ गुरुजन के समीप जाने में मुझे शर्म आती है।

राजा—अभ्युदय के समय ऐसा करना ही चाहिए। इसलिए आओ।

(सब घूमते हैं।)

(इसके बाद अदिति के साथ आसन पर बैठे कश्यप दिखायी पड़ते हैं)

---

possesor of super human power? Now you please come, His holiness Mārīca is waiting for you (he wants to see you).

The king—Dear! hold the son. I desire to see his reverence placing you in front of me.

Śakuntalā—I feel bashful to go near the elders in company with my lord.

The king—Even this should be observed in times of prosperity. So, come with me.

(All walk round)

(Then enter Mariche occupying a seat with Aditi)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मारीचः—(राजानमवलोक्य) दाक्षायणि!

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्त्ता।
चापेन यस्य विनिवर्त्तितकर्म्म जातं
तत् कोटिमत्कुलिशमाभरणं मघोनः॥ २६॥

अदिति—संभावणीअप्पहावा से आकिदि। [**सम्भावनीयप्रभावा अस्याकृतिः।**]

मारीचः—राजानमवलोक्य=दुष्यन्तं दृष्ट्वा) दाक्षायणि!=दक्षस्यापत्यं स्त्री, तत्सम्बुद्धौ दाक्षायणि=दक्षदुहिते!

अन्वयः—अयं ते पुत्रस्य रणशिरसि अग्रयायी दुष्यन्त इति अभिहितः भुवनस्य भर्त्ता यस्य चापेन विनिवर्त्तितकर्म्म तत् कोटिमत् कुलिशं मघोनः आभरणं जातम्।

पुत्रस्येति। अयम्=उपस्थित एषः पुरुषः, ते=तव, पुत्रस्य, रणशिरसि=समरमूर्द्धनि, अग्रयायी=अग्रेसरः, दुष्यन्त इति अभिहितः=दुष्यन्त इति नाम्ना लोके प्रसिद्धः, भुवनस्य=भूमण्डलस्य, भर्त्ता=पालकः, यस्य=दुष्यन्तस्य, चापेन=धनुषा, विनिवर्त्तितम्=सम्पादितं, कर्म्म=दानवविजयरूपं कार्य्यं, यस्य तत् विनिवर्त्तितकर्म्म, तत्=प्रसिद्धम्, कोटिमत्=तीक्ष्णाग्रम्, कुलिशं=वज्रम्, मघोनः=इन्द्रस्य, आभरणम्=शोभामात्रफलकम्, जातम्=समपद्यत। अत्र उदात्तालङ्कारः, रूपकञ्च। वसन्ततिलका वृत्तम्॥ २६॥

भावार्थः—उपस्थित एषः पुरुषः समरमूर्द्धनि तव पुत्रस्य अग्रेसरः भवति, दुष्यन्त इति नाम्ना लोके प्रसिद्धः अयं भूमण्डलस्य पालक अस्ति। कुलिशं हि केवलं मघोनः करशोभामात्रं जनयति न तेन शत्रुपराजयः साध्यते, अनेनैव रणशिरसि स्थित्वा निखिलशत्रोर्हननादिति भावः॥ २६॥

अदितिः—सम्भावनीयः=ऊह्यः, प्रभावः=शक्तिः, यया सा सम्भावनीयप्रभावा, अस्य=पुरुषस्य, आकृतिः=मूर्तिः (अस्याकृतिरेव तादृशालौकिकप्रभावं सूचयतीति भावः)।

मारीच—(राजा को देखकर) दाक्षायणी!

यह व्यक्ति तुम्हारे पुत्र इन्द्र के युद्ध में आगे चलने वाला है। लोक में यह दुष्यन्त नाम से प्रसिद्ध है और लोक का पालनकर्त्ता है। इसके धनुष से ही इन्द्र के समस्त कार्य पूर्ण हो जाते हैं और इन्द्र का तीक्ष्ण वज्र इन्द्र के लिए केवल आभरण मात्र बनकर रह जाता है॥ २६॥

अदिति—इसकी आकृति देखकर ही इसके प्रभाव का अनुमान हो जाता है।

Mārīca—Dākshāyaṇī—

Here is he, who marches, foremost at the head of your son's battles, addressed to as Duśyanta, the sustainer of the world, by whose bow, its office having been performed, that edged thunder-bolt has become a mere ornament to Indra.

Aditi—His form has its majesty capable of being inferred from it.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—आयुष्मन्! एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः, तदुपसर्प।

राजा—मातले!

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्त्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम्।
यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसम्भवमिदं तत् स्रष्टुरेकान्तरम्॥ २७॥

मातलिः—आयुष्मन्! एतौ दिवौकसां=देवानां, पितरौ=मातापितरौ, अदितिकश्यपौ, आयुष्मन्तं=भवन्तम्, पुत्रे=पुत्रस्वरूपे त्वयि, या प्रीतिः=स्नेहः, तस्या पिशुनेन=सूचकेन, चक्षुषा=नेत्रेण, अवलोकयतः=पश्यतः, तत्=तस्मात्, उपसर्प=एतयोः समीपं गच्छ।

राजा—मातले!

अन्वयः—मुनयः यत् द्वन्द्वं द्वादशधा स्थितस्य तेजसः कारणं प्राहुः, यत् द्वन्द्वं भुवनत्रयस्य भर्त्तारं यज्ञभागेश्वरं सुषुवे, तथा यस्मिन् आत्मभुवः परः पुरुषः अपि भवाय आस्पदं चक्रे; दक्षमरीचिसम्भवं स्रष्टुः एकान्तरम् इदं तत् द्वन्द्वं किम्?॥ २७॥

प्राहुरिति। मुनयः=व्यासादयः, यत् द्वन्द्वं=मिथुनम् (कर्म्म), द्वादशधा=द्वादशभिः प्रकारैः, स्थितस्य=विद्यमानस्य (द्वादशसु मासेषु द्वादशमूर्तिधरस्य), तेजसः=सूर्य्यस्य, कारणं=प्रभवम्, प्राहुः=वदन्ति। यत् द्वन्द्वम्, भुवनत्रयस्य=भूर्भुवःस्वर्लक्षणस्य लोकस्य, भर्त्तारम्=पालकम् (धारणसमर्थं स्वामिनम्), तथा यज्ञे भागो येषान्ते यज्ञभागाः=देवाः, तेषामीश्वरं यज्ञभागेश्वरम्=इन्द्रम्, सुषुवे=जनयामास। तथा यस्मिन्=द्वन्द्वे, आत्मभुवः=ब्रह्मणः, परः=उत्कृष्टः, पुरुषः=नारायणः, अपि, भवाय=वामनरूपेण जन्मने, आस्पदं=जन्मता सम्बन्धेन प्रतिष्ठाम्, चक्रे=कृतवान्। दक्षमरीचिभ्यां सकाशात् सम्भवतीति दक्षमरीचिसम्भवम्=दक्षसम्भवा अदितिः मरीचिसम्भवः कश्यपश्चेत्युभयरूपम्, स्रष्टुः=विधातुर्ब्रह्मणः, सकाशात्, एकेन=पुरुषेण दक्षेण मरीचिना च, अन्तरं=व्यवधानं, यस्य तत् एकान्तरम्, इदं=पुरोदृश्यमानम्, तत्=प्रसिद्धं, द्वन्द्वम्=अदितिकश्यपात्मकस्त्री-

---

मातलि—आयुष्मान्! देवताओं के पिता और उनकी माता पुत्रस्नेहयुक्त दृष्टि से आप को देख रहे हैं। अतः इनके पास पहुँचिए।

राजा—मातलि!

मुनिगण जिन्हें द्वादश भागों में विभक्त तेज (सूर्य) का पिता कहते हैं, जिन्होंने तीनों लोकों के भर्त्ता और यज्ञभाग के अधिकारी इन्द्र को उत्पन्न किया और ब्रह्मा से भी प्रधान पुरुष

Mātali—Long-lived one! here the parents of the gods are looking at the long lived one with an eye indicative of an affection for a son. Approach them.

The king—Mātali—

Is this that pair, sprung from Daksha and Mārīci, sepereted by one from the creator, which sages call the source of the luster that subsists in twelve forms (the sun), which begot the lord of the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—अथ किम्?

राजा—(प्रणिपत्य) उभाभ्यामपि वां वासवनियोज्यो दुष्यन्तः प्रणमति।

मारीचः—वत्स! चिरं जीवन् पृथिवीं पालय।

अदितिः—अप्पदिरधो होहि। **[अप्रतिरथो भव।]**

(शकुन्तला पुत्रसहिता पादयोः पतति)

पुंसौ किम्? काक्वाऽयं प्रश्नो गम्यते। अत्र नानाविधकारणोपन्यासात् समुच्चयालङ्कारः। शार्दूलविक्रीडितं वृत्तम्॥ २७॥

भावार्थः—व्यासादयः यत् द्वन्द्वं द्वादशधा स्थितस्य सूर्यस्य प्रभवं वदन्ति, तथा च यत् द्वन्द्वं भुवनत्रयस्य भर्त्तारं किञ्च यज्ञभागेश्वरं (इन्द्रम्) सुषुवे, तथा यस्मिन् द्वन्द्वे आत्मभुवः परः पुरुषः नारायणः अपि वामनरूपेण जन्मने जन्यतासम्बन्धेन प्रतिष्ठां कृतवान्; दक्षमरीचिसम्भवं विधातुर्ब्रह्मणः सकाशात् एकान्तरम् इदं पुरोदृश्यमानं तत् द्वन्द्वं किम्? इति राज्ञः जिज्ञासा इति च भावः॥ २७॥

मातलिः—अथ किम्=इदमेकमव्ययमङ्गीकारार्थकम्। त्वं यदात्थ तत्तथैवेति।

राजा—(प्रणिपत्य=नम्रीभूय) वासवस्य=इन्द्रस्य, नियोज्यः=किङ्करः, वासवनियोज्यः, दुष्यन्तः=तन्नामधेयः, उभाभ्यामपि वां=युवाभ्याम् अदितिकश्यपाभ्यां, प्रणमति=नमस्कुरुते।

मारीचः—वत्स=पुत्र! चिरं=चिरकालपर्यन्तम्, जीवन्=प्राणान् धारयन्, पृथिवीं= धरित्रीम्, पालय=रक्ष।

अदितिः—अप्रतिरथः=प्रतिपक्षशून्यः, भव।

(शकुन्तला पुत्रसहिता, पादयोः=अदितिकश्यपयोश्चरणयोः, पतति।)

नारायण ने वामन रूप में अवतरित होने के लिए जिनका आश्रय लिया; दक्ष और मरीचि से उत्पन्न तथा ब्रह्मा से केवल एक पुरुष के व्यवधान से युक्त क्या ये वही दम्पती हैं?॥ २७॥

मातलि—और क्या?

राजा—**(प्रणाम करके)** इन्द्र का सेवक दुष्यन्त आप दोनों को प्रणाम करता है।

मारीच—वत्स! बहुत समय जीते हुए (दीर्घायु होकर) प्रजा का पालन करो।

अदिति—विपक्षहीन (शत्रुहीन) होओ।

(शकुन्तला पुत्र सहित चरणों में गिरती है।)

---

three worlds, the chief of the sharers of sacrifices and in which the man who is higher than even the self-existent (Lord Bramha) made the abode for his birth. (27)

Mātali—What else?

The king—*(Saluting)* Even to you both, Duśyanta, the servant of Indra, offers his salutations.

Mārīca—Child! live long and protect the earth.

Aditi—Be an unrivalled warrior.

(Śakuntalā with her son falls at their feet)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मारीचः—वत्से!

आखण्डलसमो भर्त्ता जयन्तप्रतिमः सुतः।
आशीरन्या न ते योज्या पौलोमीमङ्गला भव॥ २८॥

अदितिः—जादे! भत्तुणो बहुमदा होहि, अअंच दीहाऊ उहअपक्खं अलंकरेदु। एध उपविसध। [जाते! भर्तुर्बहुमता भव। अयञ्च दीर्घायुः उभयपक्षमलङ्करोतु। एतम् उपविशतम्।]

(सर्वे प्रजापतिमभित उपविशन्ति)

मारीचः—वत्से=पुत्रि!

अन्वयः—भर्त्ता आखण्डलसमः सुतः जयन्तप्रतिमः (अत एव) ते अन्या आशीः न योज्या (केवलं) पौलोमीमङ्गला भव॥ २८॥

भर्त्ता=तव पतिर्दुष्यन्तः, आखण्डलसमः=प्रभावे सम्पत्तौ चेन्द्रतुल्यः, तथा सुतः=पुत्रः सर्वदमनः, जयन्तः=पाकशासनिः, प्रतिमा=उपमा, यस्य सः जयन्तप्रतिमः=जयन्ताख्येन्द्रपुत्रतुल्यः, अत एव ते=तव सम्बन्धे, अन्या=एतदतिरिक्ता, आशीः=शुभाशंसनम्, न योज्या=अस्माभिर्न प्रवर्त्त-नीया, केवलं, पौलोम्याः=पुलोमदुहितुः शचीदेव्याः, मङ्गलमिव मङ्गलं=सौभाग्यरूपं, यस्याः सा पौलोमीमङ्गला भव। अत्र वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, उपमाऽलङ्कारश्च। अनुष्टुप् वृत्तम्॥ २८॥

भावार्थः—यस्य ते भर्त्ता प्रभावे सम्पत्तौ चेन्द्रतुल्यः, पुत्रश्च जयन्तप्रतिमः सा त्वम् अन्या आशीः नापेक्षसे केवलं यथेन्द्राणी नियतमिन्द्रेणाविरहिता चिरमविधवा च तथा त्वमपि भूया इत्येव आशीः त्वद्विषये योज्या इति भावः॥ २८॥

अदितिः—जाते=पुत्रि! भर्त्तुः=पत्युः, बहुमता=अत्यादृता, भव। अयञ्च दीर्घायुः= चिरंजीवी ते पुत्रः, उभयपक्षम्=मातृकुलं पितृकुलञ्च, अलङ्करोतु=भूषयतु। एतम्=आगच्छतम्, उपविशतम्=उपवेशनं कुरुतम्, युवामिति शेषः।

(सर्वे=दुष्यन्तः, मातलिः पुत्रसहिता शकुन्तला च, प्रजापतिम्=कश्यपम्, अभितः= उभयपार्श्वयोः, उपविशन्ति।)

मारीच—पुत्री! इन्द्र के तुल्य तुम्हारे पति हैं और जयन्त के समान पुत्र। अतः अन्य आशीर्वाद न देकर केवल यही आशीर्वाद देता हूँ कि तुम इन्द्राणी के समान अखण्ड सौभाग्यवती (मङ्गलवती) होओ॥ २८॥

अदिति—पुत्री! पति की सम्माननीया बनो और यह चिरंजीवी बालक मातृ-पितृ दोनों कुलों को अलंकृत करे। आओ बैठो।

(सब कश्यप के आस-पास बैठ जाते हैं।)

Mārīca—Daughter! Your husband is like Indra, your son resembles Jayanta. No other benedication is suitable to you. may you be like pulomaja (wife of Indra). (28)

Aditi—Daughter! be highly respected by your husband and may this long lived (your son) be the delighter of both families. Sit down.

(All sit down around Prajāpati)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मारीचः—(एकैकं निर्दिशन्)

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं यत् समागतम्॥ २९॥

राजा—भगवन्! प्रागभिप्रेतसिद्धिः, पश्चाद्दर्शनम्; इत्यपूर्वः खलु वोऽनुग्रहः। कुतः—

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तकयोरयं क्रमस्तव प्रसादस्य पुरस्तु सम्पदः॥ ३०॥

मारीचः—एकैकं=क्रमशः प्रत्येकं, निर्दिशन्=अङ्गुल्या दर्शयन्—

अन्वयः—दिष्ट्या साध्वी शकुन्तला, इदं सदपत्यं, तथा भवान् तत् श्रद्धा वित्तं विधिः च इति त्रितयं समागतम्॥ २९॥

दिष्टयेति। दिष्ट्या=भाग्येन, साध्वी=सच्चरित्रा, शकुन्तला, इदं सदपत्यम्=अयं सत्पुत्रः, तथा भवान्=तत्तद्गुणगरिष्ठो भवान्, तत्=तस्मात्, श्रद्धा=आस्तिक्यबुद्धिः, वित्तं=धनम्, विधिः=यागादिक्रिया, इति त्रितयम्=एतत् त्रयम्, समागतम्=मिलितम्। अत्र समालङ्कारः। अनुष्टुप् वृत्तम्॥ २९॥

भावार्थः—शकुन्तला श्रद्धा, सदपत्यं वित्तं, भवांश्च विधिः एतत् त्रयं दिष्ट्या समागतम् इति मन्ये इति भावः॥ २९॥

राजा—भगवन्! प्राग्=पूर्वम्, अभिप्रेतस्य=अभिलषितस्य—पुत्रकलत्रसमागमरूपस्य, सिद्धिः=निष्पत्तिः पश्चात् (युष्माकम्) दर्शनम्, (इत्थं) वः=युष्माकम्, अनुग्रहः=अनुकम्पारूप-प्रसादः, अपूर्वः खलु=विचित्र एव (प्राक् फलं पश्चात् दर्शनमित्यपूर्वता)। कुतः—

अन्वयः—पूर्वं कुसुमम् उदेति ततः फलम् उदेति, तथा प्राक् घनोदयः भवति तदनन्तरं पयः भवति। तथा च निमित्तनैमित्तिकयोः अयं क्रमः तु तव प्रसादस्य पुरः सम्पदः।

मारीच—एक-एक का निर्देश करते हुए—

यह साध्वी शकुन्तला, उत्तम पुत्र और आप तीनों को आज भाग्यवश एकत्र देखकर यह प्रतीत होता है कि मानो श्रद्धा, धन और विधि आज ये तीनों एकत्र हो गये हों॥ २९॥

राजा—भगवन्! पहले तो हमारी अभीष्ट सिद्धि हुई, पश्चात् आपका दर्शन हुआ। यह आपका अनुग्रह सर्वथा अभूतपूर्व है; क्योंकि—

पहले फूल आता है उसके बाद फल। पहले मेघ प्रगट होता है फिर जल। इसी प्रकार

Mārīca—(Pointing to each)

Fortunately, virtuous Śakuntalā, this noble child and yourself that triad, faith, fortune and performance (of yajña), is here com-bined. (29)

The king—Your holiness! first the accomplishment of desire, afterwards your sight. Therefore your favour is indeed unprecedented. Why—

First appears the flower, then the fruit; first the rising of

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मातलिः—आयुष्मन्! एवं प्रसीदन्ति विश्वगुरवः।

राजा—भगवन्! इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन्नपराद्धोऽस्मि, अत्रभवतो युष्मद्गोत्रस्य कण्वस्य, पश्चादेनामङ्गुरीयकदर्शनारूढस्मृतिः ऊढपूर्वामवगतोऽहम्, तच्चित्रमिव मे प्रतिभाति।

उदेतीति। पूर्वम्=फलसमागात् प्राक्, कुसुमं=फलकारणीभूतं पुष्पम्, उदेति=उद्गच्छति, ततः=तदनन्तरम्, फलं=कुसुमकार्य्यभूतं फलम् उदेति। तथा प्राक्=पूर्वम्, घनोदयः=मेघाविर्भावः, भवति, तदनन्तरम्=तत्पश्चात्, पयः=घनोदयकार्य्यभूतं वृष्टिजलं भवति। तथा च निमित्तनैमित्तिकयोः=कारणकार्य्यमात्रयोः, अयम्=उक्तरूपः, क्रमः=पौर्वापर्य्यभावनियमः, तु=किन्तु, तव प्रसादस्य=सम्पत्कारिणीभूतानुग्रहस्य, पुरः=पूर्वमेव, सम्पदः=कार्य्यभूतपुत्रकलत्रादिलाभसम्पत्तयः। अत्र काव्यलिङ्गं क्रियादीपकालङ्कारश्च। केचित्तु दृष्टान्तोऽलङ्कारः। वंशस्थविलं वृत्तम्॥ ३०॥

भावार्थः—सर्वत्राशिषोऽनन्तरं सम्पल्लाभस्य नियमः दृष्टिपथमायाति, अत्र तु पुत्र-कलत्र-रूपसम्पल्लाभानन्तरमाशीः प्रकाश इति निपुणं भवत आशिषो वैशिष्ट्यम् इत्याशयः॥ ३०॥

मातलिः—आयुष्मन्=प्रशस्तायुःशालिन्! विश्वेषां=निखिलानां, गुरवः=स्रष्टारः, विश्वगुरवः (क्वचित् विधातारः), एवम्=इत्थम्प्रकारमेव, प्रसीदन्ति=अनुगृह्णन्ति। (इच्छासिद्धयो विश्वगुरवो यद् यदैवेच्छन्ति तत्तदेव सम्पद्यत इति भावः।)

राजा—भगवन्! वः=युष्माकं, आज्ञाकरीम्=आज्ञाकारिणीम्, इमाम्=शकुन्तलाम्, गान्धर्वेण=तदाख्येन, विवाहविधिना=विधानेन, उपयम्य=परिणीय, कस्यचित् कालस्य अतिक्रमानन्तरम्=किञ्चित्कालानन्तरम्, बन्धुभिः=शार्ङ्गरवशारद्वतादिभिः, आनीतां=मत्समीपमुपस्थापिताम्, इमां शकुन्तलाम्, स्मृतिशैथिल्यात्=स्मृतिभ्रंशात्, प्रत्यादिशन्=निराकुर्वन्, अपराद्धोऽस्मि=कृतापराद्धोऽस्मि। अत्रभवतः=पूजनीयस्य, युष्मद्गोत्रस्य=भवद्वंशीयस्य, कण्वस्य=कण्वेति नाम्ना

निमित्त और नैमित्तिक का क्रम बँधा हुआ है परन्तु आपकी कृपा कुछ अनोखी है, क्योंकि उसमें पहले सम्पद्-प्राप्ति होती है और दर्शन बाद में मिलते हैं॥ ३०॥

मातलि—आयुष्मन्! विश्वगुरु इसी प्रकार प्रसन्न होते हैं।

राजा—आपकी आज्ञाकारिणी इस शकुन्तला के साथ मैंने गान्धर्व विवाह किया था। कुछ समय पश्चात् इसके बान्धव इसे मेरे पास लाये, उस समय विवाह की बात भूल जाने के कारण इसका तिरस्कार करके मैं आपके वंशज पूज्य कण्व का अपराधी बना। इसके बाद

---

clouds, after that the water (rain) of the cause and effect this is the order; but prosperity has come in advance of your favour. (30)

Mātali—Long-lived one! thus the ordainers (preceptors of the universe) show favour.

The king—Sir! having married this lady, obedient to your commands, by the Gandharva form of marriage and repudiating her through looseness of memory, when brought to me some time after by her relatives, I have offended your kinsman, the revered Kaṇva. Afterwards at the sight of the ring I came to know his

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथा गजे साधु समक्षरूपे कस्मिन्नपि क्रामति संशयः स्यात्।
पदानि दृष्ट्वाथ भवेत् प्रतीतिस्तथाविधो मे मनसो विकारः॥ ३१॥

मारीचः—वत्स! अलमात्मापराधशङ्कया, सम्मोहोऽपि त्वय्युपपन्न एव। श्रूयताम्—

प्रसिद्धस्य, अपराद्धोऽस्मि। पश्चात्=तदनन्तरम्, एनाम्= पुरतःस्थिताम्, अङ्गुरीयकदर्शनेन=नामाङ्कितमुद्रादर्शनेन, आरूढा=उदिता (उत्पन्ना), स्मृतिर्यस्य सः अङ्गुरीयकदर्शनारूढस्मृतिः, ऊढपूर्वाम्=पूर्वं परिणीताम्, इति अहम् अवगतः=ज्ञातवान्, तत्=स्मृतिशैथिल्यं साक्षाद्दृष्टायामज्ञानमङ्गुरीयकदर्शनाच्च ज्ञानम्, चित्रमिव=आश्चर्यमिव, मे=मम सम्बन्धे, प्रतिभाति=प्रकाशते।

अन्वयः—साधु समक्षरूपे कस्मिन्नपि गजे क्रामति (यथा) संशयः स्यात्, अथ पदानि दृष्ट्वा प्रतीतिः मे मनसः तथाविधः विकारः (आसीत्)।

यथेति। साधु=सम्यक्, समक्षं=प्रत्यक्षीभूतं, रूपम्=आकृतिः, यस्य तस्मिन् समक्षरूपे, कस्मिन्नपि गजे=हस्तिनि, क्रामति=तिरोहिते सति, यथा संशयः=सन्देहः (गजो वा न वा इति), स्यात्=भवेत्। अथ=अनन्तरम्, पदानि=तस्यैव गजस्य पादन्यासचिह्नानि, दृष्ट्वा=अवलोक्य, प्रतीतिः=निश्चयात्मकः प्रत्ययो भवेत्, मे=मम, मनसः=चित्तस्य, तथाविधः=तादृशः, विकारः= अन्यथात्वभावः, आसीत्। अत्र निदर्शनालङ्कारः। उपजातिर्वृत्तम्॥ ३१॥

भावार्थः—सम्यक्तया प्रत्यक्षीभूतेऽपि कस्मिन्नपि गजे स्वपुरतः तिरोहिते सति यथा गजो वा न वा इति सन्देहः कस्यापि मनसि उत्पन्नो भवेत् तथैव पूर्वमस्यामुपगतायामियं न मम भावयेति पुनस्तिरोहितायां 'इयं किं परिणीतपूर्वा' इति पश्चाद् अङ्गुलीयकदर्शनेन—'मम भार्यैवे'ति प्रतीतिर्जातेति भावः॥ ३१॥

मारीचः—वत्स=पुत्र! आत्मापराधशङ्कया—आत्मनो योऽपराधः=शकुन्तलाप्रत्याख्यान-

---

अंगूठी देखने पर मुझे याद आया कि यह मेरी पूर्व विवाहिता है। यह सब मुझे विचित्र-सा लगता है; क्योंकि—

जैसे कोई हाथी ठीक सामने से निकल जाय और बाद में सन्देह उत्पन्न हो कि हाथी गया है या नहीं, तदनन्तर उसके पाँवों के चिह्न देखकर यह निश्चय किया जाय कि हाथी ही गया है, इसी प्रकार मेरे मन की भी स्थिति (मन में विकार उत्पन्न हुआ) हुई थी॥ ३१॥

मारीच—वत्स! तुम स्वयं के अपराधी होने की शङ्का न करो। इस प्रकार का सम्मोह भी तुम्हारे लिए उपयुक्त ही हुआ। सुनो।

---

daughter as having been married by me (previously). That appears as though strange to me.

Just as (one should think this is) not an elephant when its form is before one's eyes, then a doubt (as to whether it was, or was not, an elephant) should arise, when it is passing away, but after seeing its foot steps conviction should take place, of that kind is the change of my mind. (31)

Mārīca—Child! away with suspicion of your own fault. Even infatuation in you was accountable. Listen—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अवहितोऽस्मि।

मारीचः—यदैवाप्सरस्तीर्थावतरणात् प्रत्याख्यानविक्लवां शकुन्तलामादाय दाक्षायणीमुपगता मेनका, तदैव ध्यानादवगतवृत्तान्तोऽस्मि, दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा; स चाङ्गुरीयदर्शनावसानः शाप इति।

राजा—(सोच्छ्वासमात्मगतम्) एष वचनीयान्मुक्तोऽस्मि।

द्वारा कण्वमहर्षौ समाचरितो दोषः, तस्य शङ्कया=सम्भावनया, अलम्=न प्रयोजनम्। सम्मोहः=स्मृतिभ्रंशः, अपि, त्वयि=दुष्यन्ते, उपपन्न एव=युक्त एव। श्रूयताम्=आकर्ण्यताम्। सम्मोहकारणं वर्णयामि तदाकर्णय इति भावः।

राजा—अवहितोऽस्मि=श्रवणाय कृतमनोयोगोऽस्मि।

मारीचः—यदा एव, अप्सरस्तीर्थस्य=शचीतीर्थस्य, अवतरणात्=घट्टात्, अप्सरस्तीर्थावतरणात्, प्रत्याख्यानविक्लवां=निराकरणकातराम्, शकुन्तलामादाय=गृहीत्वा, मेनका=तन्नाम्नी अप्सरा, दाक्षायणीम्=अदितिम्, उपगता=शकुन्तलाया रक्षणार्थमुपस्थिता, तदैव=तस्मिन्नेव क्षणे, ध्यानात्=प्रणिधानात्, अवगतवृत्तान्तोऽस्मि=ज्ञातसमाचारोऽस्मि। दुर्वाससः=तन्नाम्नः मुनेः, शापात्=अभिशापात्, इयं=पुरोवर्त्तिनी, तपस्विनी=दीना, सहधर्मचारिणी=धर्मपत्नी, त्वया प्रत्यादिष्टा=प्रत्याख्याता। च=तथा, सः शापः=दुर्वाससः शापः, अङ्गुरीयदर्शनावसानः—अङ्गुरीयकदर्शनमेवावसानं=समाप्तिः, यस्य सः तथाभूतः (जातः), दुर्वाससः शापादेव त्वयि सम्मोहः समुत्पन्न इति भावः।

राजा—(सोच्छ्वासम्=सदीर्घनिश्वासम्, आत्मगतम्=स्वगतम्) एषः=दुष्यन्तः (अहम्), वचनीयात्=अकारणं शकुन्तला निराकृता इति लोकापवादात्, मुक्तोऽस्मि (दुर्वाससः शापादेव तदा तथाचरितम् इति लोकापवादात् मुक्तोऽस्मि)।

राजा—मैं सावधान हूँ।

मारीच—जिस समय निरादृत विह्वला शकुन्तला को मेनका शचीतीर्थ से लेकर यहाँ अदिति के पास आयी, उसी समय मैंने ध्यान द्वारा यह सब वृत्तान्त जान लिया था कि दुर्वासा के शाप से तुमने इस अपनी दीन धर्मपत्नी को त्याग दिया है और अंगूठी का दर्शन ही उस शाप का अन्त था।

राजा—(**लम्बी साँस भरकर**) लो, (अब) मुझे बदनामी से छुटकारा मिला।

The king—I am attentive.

Mārīca—Even when Menakā came to Dakshāyaṇī bringing Śakuntalā, whose distress was quite visible from the ford (shallowpant of a river) of the Apsarā-tīrtha, exactly then I knew from contemplation that owing to the curse of Durvāsā this poor partner of yours in religion was repudiated by you and not otherwise. And here that curse has its termination at the sight of the ring.

The king—*(With a sigh of relief)* Here I am freed from blame.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(स्वगतम्) दिट्ठिआ अआरणपच्चादेशी ण अज्जउत्तो। ण उण सत्तं अत्ताणं सुमरेमि। अधवा ण सुदो सुण्णहिअआए मए अअं सावो, जदो सहीहिं अच्चाअरेण संदिट्ठम्हि 'सो राआ! जइ तुमं ण सुमरेदि, तदा एदं अंगुलीअअं दंसेसि' त्ति। [**दिष्ट्या अकारणप्रत्यादेशी नार्यपुत्रः। न पुनः शप्तमात्मानं स्मरामि। अथवा न श्रुतः शून्यहृदयया मया अयं शापः, यतः सखीभ्यामत्यादरेण सन्दिष्टास्मि, 'स राजा यदि त्वां न स्मरति, तदा इदमङ्गुरीयकं दर्शयसि' इति।**]

मारीचः—(शकुन्तलां विलोक्य) वत्से! विदितार्थासि। तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्युः करणीयः। पश्य—

शकुन्तला—(स्वगतम्) दिष्ट्या=भाग्येन, आर्यपुत्रः=मदीयभर्त्ता, अकारणप्रत्यादेशी=कारणं विनैव मम निराकरणकारी, न=नास्ति। पुनः=भूयः (किञ्च), आत्मानं=शकुन्तलाम्, शप्तम्=दुर्वाससः शापवादविषयम्, न स्मरामि। अथवा, शून्यहृदयया=चिन्तावशादन्यमनस्कया, मया=शकुन्तलया, अयं=कश्यपोक्तः शापः, न श्रुतः=नाकर्णितः। यतः=अत एव प्रस्थानकाले (आश्रमात् पतिगृहं प्रति इति भावः), सखीभ्याम्=अनसूया-प्रियंवदाभ्याम्, अत्यादरेण=सम्मानपूर्वकम् सन्दिष्टास्मि=उपदिष्टास्मि। स राजा=दुष्यन्तः, यदि=चेत्, त्वाम्=भवतीम्, न स्मरति=न स्मरिष्यति, तदा इदमङ्गुरीयकम्=तन्नामाङ्कितमुद्रिकां, दर्शयसि इति। यदि प्रत्यभिज्ञानमन्थरो राजा त्वां न स्मरिष्यति तदास्मै इदमङ्गुरीयकं दर्शयिष्यसि। इत्येवं कथं वोक्तमभूदित्याशयः।

मारीचः—(शकुन्तलां विलोक्य) वत्से! विदितार्थासि=अवगतवस्तुतत्त्वाऽसि। तत्=तस्मात्, इदानीम्=सम्प्रति, सहधर्म्मचारिणं=भर्त्तारम् (प्रति), त्वया, न=नैव, मन्युः=क्रोधः, करणीयः=कर्त्तव्यः। पश्य—

शकुन्तला—(**स्वगत**) भाग्यवश महाराज ने अकारण नहीं त्यागा था। किन्तु मुझे अपने अभिशप्त होने की बात याद नहीं आती। अथवा सम्भव है शून्यहृदया मैंने उस समय इस शाप को नहीं सुना हो। क्योंकि (पतिगृह जाते समय) मेरी सखियों ने विशेष आदर का प्रदर्शन करते हुए मुझसे कहा था कि 'यदि राजा तुम्हें स्मरण न कर पायें तो उन्हें यह अंगूठी दिखा देना।'

मारीच—(**शकुन्तला को देखकर**) पुत्री! समस्त वृत्तान्त तुम्हें विदित हो गया है, अतः अब अपने स्वामी से क्रुद्ध न होना। देखो—

Śakuntalā—*(To herself)* Fortunately my lord did not repudiate me without any reason. I really do not remember myself to have been cursed or indeed the curse though incurred, was not known by me, being absent minded then. Therefore I was directed by my friends that the ring should be shown to my husband.

Mārīca—*(Observing towards Śakuntalā)* Daughter! you have come to know the facts. Therefore now no resentment should be entertained by you towards your co-worker in religion (life partner). Behold—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शापादसि प्रतिहता स्मृतिलोपरूक्षे
भर्त्तर्यपेततमसि प्रभुता तवैव।
छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा॥ ३२॥

राजा—यथाह भगवान्।

मारीचः—वत्स! कच्चिदभिनन्दितस्त्वया अस्माभिर्विधिवदनुष्ठितजातकर्मादिक्रियः पुत्र एष शाकुन्तलेयः?

अन्वयः—भर्त्तरि शापात् स्मृतिलोपरूक्षे प्रतिहता असि। (अधुना) अपेततमसि भर्तरि तवैव प्रभुता (वर्त्तते)। तथा च छाया मलोपहतप्रसादे न मूर्च्छति, तु शुद्धे दर्पणतले सुलभावकाशा भवति॥ ३२॥

शापादिति। भर्त्तरि=पत्यौ दुष्यन्ते, शापात्=दुर्वाससः अभिशापात्, स्मृतिलोपेन=स्मृति-भ्रंशेन, रूक्षे=प्रत्याख्याननिष्ठुरे सति, प्रतिहता=त्वं निराकृताऽसि। अधुना, अपेतम्=अपगतं, तमः=मोहः, यस्य सः अपेततमसि, भर्त्तरि=तस्मिन्नेव पत्यौ, तवैव प्रभुता=पत्नीलभ्यं प्रभुत्वं सहवासादिविषये वर्त्तते। तथा च छाया=प्रतिबिम्बम्, मलेन=आगन्तुकमालिन्येन, उपहतः=विलुप्तः, प्रसादः=स्वच्छता, यस्य तस्मिन् मलोपहतप्रसादे, दर्पणतले=मुकुरोपरि, न मूर्च्छति=न पतति। तु=परन्तु, शुद्धे=निर्मले, तस्मिन्नेव दर्पणतले, सुलभः=अव्याहत्या लभ्यः, अवकाशः=प्रवेशः, यया सा सुलभावकाशा भवत्येवेति शेषः। अत्र रूपकातिशयोक्तिः दृष्टान्तश्चालङ्कारः। वसन्ततिलकं वृत्तम्॥ ३२॥

भावार्थः—यद्यपि दुर्वाससः शापवशादेव त्वम् अनेन पुरा निराकृतासि तथापि अधुना अपेततमसि भर्तरि तवैव प्रभुता वर्त्तते। यथा मलोपहतप्रसादे छाया न पतति परन्तु शुद्धे दर्पणतले सा सुलभावकाशा भवति। तथैवावस्थानमपि अवेहि॥ ३२॥

राजा—यथाह भगवान्=भवान् यदुक्तवान् तत्सत्यमेव।

दुर्वासा के शापवश भूल जाने के कारण इन्होंने निष्ठुर भाव से तुम्हारा तिरस्कार किया था, अब इन्हें यह बात याद आ गई है, अतः इन पर अब तुम्हारी ही प्रभुता हो गई है; क्योंकि दर्पण पर यदि धूल आदि गिर जाय तब प्रतिबिम्ब भलीभाँति नहीं दीखता परन्तु दर्पण के स्वच्छ होने पर वह उसमें सुस्पष्टतया प्रतिबिम्बित होता है॥ २३॥

राजा—आपका कहना यथार्थ है।

You were repulsed through the curse, your husband being harsh through the obstraction of his memory, but now over your husband whose darkness has gone away your's alone is the mastery. An image takes, no effect on the surface of a mirror, whose brightness is marred by dust, but on a clean one it finds easy scope. (32)

The king—As your reverance says.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—भगवन्! अत्र खलु मे वंशप्रतिष्ठा। (इति बालकं हस्तेन गृह्णाति।)

मारीचः—भाविनं चक्रवर्त्तिनमेनमवगच्छतु भवान्। पश्यतु—

रथेनानुद्धातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।
इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्॥ ३३॥

मारीचः—वत्स=पुत्र! अस्माभिः=मया मुनिगणेन समम्, विधिवत्=यथाशास्त्रम्, अनुष्ठिताः=कृताः, जातकर्म्मादिक्रियाः यस्य सः विधिवदनुष्ठितजातकर्म्मादिक्रियः, शाकुन्तलेयः=शकुन्तलाया अपत्यं, शकुन्तलागर्भसम्भूतः, एषः=पुरः स्थितः, पुत्रः=सन्ततिः, त्वया=भवता, अभिनन्दितः=अतिशयेनादृतः, कच्चित्? इत्यहं वेदितुमिच्छामि। (इति एवमुक्त्वा बालकं=तनयं सर्वदमनं, हस्तेन=करणे गृह्णाति)

राजा—भगवन्! अत्र खलु=अस्मिन्नेव शाकुन्तलेये पुत्रे, मे=मम, वंशस्य=कुलस्य, प्रतिष्ठा=स्थितिः, तस्मात् कथं नाभिनन्दामि? इत्याशयः। (इति=एतमुक्त्वा, बालकं=तनयं सर्वदमनं, हस्तेन=करेण गृह्णाति)

मारीचः—एनं=पुत्रम्, भाविनं=भविष्यन्तम्, चक्रवर्तिनम्=सम्राजम्, अवगच्छतु=जानातु, भवान्=त्वम्। अयमेव शाकुन्तलेयः पुत्रः कालेन चक्रवर्ती भवष्यतीत्यवेहि। पश्यतु—

अन्वयः—अयं अप्रतिरथः सन् अनुद्धातस्तिमितयतिना रथेन तीर्णजलधिः सन् पुरा सप्तद्वीपां वसुधां जयति। इह सत्त्वानां प्रसभदमनात् सर्वदमनः अयं पुनः लोकस्य भरणात् भरत इति आख्यां यास्यति॥ ३३॥

रथेनेति। अयम्=एषः शाकुन्तलेयः, अप्रतिरथः=शत्रुहीनः सन्, अनुद्धातेन=अभूतलस्पर्शात् प्रतिघाताभावेन, स्तिमिता=निश्चला, गतिः=गमनं, यस्य तेन अनुद्धातस्तिमित-

---

मारीच—पुत्र! हम लोगों ने जिसके विधिपूर्वक जातकर्म आदि संस्कार करा दिये हैं, उस शकुन्तला के पुत्र का आपने अभिनन्दन किया है या नहीं?

राजा—भगवन्! यही बालक तो मेरे वंश का आधार है।

(यह कहकर बालक को हाथ से ग्रहण करता है।)

मारीच—आप इसे भावी चक्रवर्ती समझें। देखिए—

आपका यह पुत्र शत्रुविहीन होकर किसी को हानि न पहुँचाते हुए गम्भीर गति से चलने वाले अपने रथ से समुद्रों का उल्लंघन कर इस सप्तद्वीपवती पृथिवी को जीतेगा। इस

***Mārīca*—**Son! have you greated this son of Śakuntalā whose natal ceremony is performed by us according to injunction.

***The king*—**Your reverence! in him indeed lies the permanence of my family or line.

***Mārīca*—**Similarly may your majesty know him to be the universal emperor that is to be. Behold—

Crossing the oceans in a chariot, whose motion will be steady he, an unrivalled warrior, will surely conquer the earth, which is having seven islands. Here known as Sarvadamana from

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—भगवत्कृतसंस्कारेऽस्मिन् सर्वमाशंसे।

अदितिः—इमाए दुहिदिमणोरहसंपत्तीए कण्णो दाव सुदवित्थारो करीअदु, दुहिदिवच्छला मेणआ उर इध मं परिअरंती सण्णिहिदा ज्जेव। [**अनया दुहितृमनोरथसम्पत्त्या कण्वस्तावत् श्रुतविस्तारः क्रियताम्, दुहितृवत्सला मेनका पुनरिह मां परिचरन्ती सन्निहितैव।**]

गतिना, रथेन=स्यन्दनेन, उत व्योमयानेन, तीर्णाः=लङ्घिताः, जलधयः=सप्त समुद्राः, येन सः तीर्णजलधिः सन्, पुरा=आगामिनि काले, सप्तद्वीपाम्=सप्तद्वीपयुक्ताम्, वसुधाम्=पृथिवीम्, जयति=जेष्यति। इह=अस्मिन्नाश्रमे, सत्त्वानाम्=सिंहव्याघ्रादिजन्तूनाम्, प्रसभं=हठेन, दमनात्= शासनाद्धेतोः, सर्वदमनः=सर्वदमननामा, अयं=बालः, पुनः=भूयोऽपि, लोकस्य=भुवनस्य, भरणात्=रक्षणात्, 'भरत इति' आख्यां=संज्ञां, यास्यति=प्राप्स्यति। अत्र भाविकालङ्कारः काव्यलिङ्गं च। शिखरिणी वृत्तम्॥ ३३॥

भावार्थः—अचिरेणैव कालेनायं अप्रतिरथो भूत्वा सप्तद्वीपवर्ती महीं जेष्यति, पश्चात् अयं सर्वदमनः लोकस्य भरणाद्धेतोः भरत इति नाम्ना प्रसिद्धिं प्राप्स्यति। अत एव महाप्रभावोऽयं बालकस्त्वया निश्चिन्तेनावश्यमेवाभिनन्दनीय इति भावः॥ ३३॥

राजा—भगवता=अणिमाद्यैश्वर्यशालिना भवता, कृताः=विहिताः, संस्काराः=जातकर्म्मादिक्रियाः, यस्य तस्मिन् भगवत्कृतसंस्कारे, अस्मिन्=मम पुत्रे, शाकुन्तलेये, सर्वम्=जलधितरणादिकं भवदुक्तप्रकारम्, आशंसे=सम्भावये। (भवत्कृतसंस्कारशक्तिमूलकतयैवास्य सर्वाः सम्पदः सम्पत्स्यन्ते इत्याशयः।)

अदितिः—अनया, दुहितुः=सुतायाः शकुन्तलायाः, यः मनोरथः=प्रियसमागमरूपः, तस्याः सम्पत्तिः=सिद्धिः, तया दुहितृमनोरथसम्पत्त्या, तावत्, कण्वः=कण्वमहर्षिः, श्रुतः=आकर्णितः, विस्तारः=विस्तृतवृत्तान्तः, येन सः श्रुतविस्तारः, क्रियताम् (कण्वस्याप्येतदभ्युदय-

---

आश्रम के सम्पूर्ण जन्तुओं का हठपूर्वक दमन करके के कारण सर्वदमन नाम से प्रसिद्ध यह बालक आगे चलकर समस्त जगत् का भरण करने के कारण 'भरत' नाम से प्रसिद्ध होगा॥ ३३॥

राजा—स्वयं आपने ज़िसका संस्कार किया है उसके लिए सभी बातों की आशा की जा सकती है।

अदिति—कन्या की अभिलाषापूर्तिपरक समाचार अब विस्तारपूर्वक महर्षि कण्व के पास भेज देना चाहिए। पुत्री में स्नेह रखने वाली मेनका तो हमारी सेवा करती हुई यहाँ है ही।

---

his forcible taming of all animals, he will again attain the appellation, 'Bharata' from his support of the world. (33)

The king—We expect all in him, whose purifactory rites have been performed by your reverence.

Aditi—Let Kaṇva also be made acquainted with the details of this fulfilment of his daughter's hearty desires. Menakā full of affection for her daughter, is even here staying in our attendence.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तला—(आत्मगतम्) मणोगदं मे बाहरिदं भअवदीए। **[मनोगतं मे व्याहृतं भगवत्या।]**

मारीचः—तपःप्रभावात् सर्वमिदं प्रत्यक्षं तत्रभवतः कण्वस्य।

राजा—अतः खलु ममानतिक्रुद्धो मुनिः।

मारीचः—तथाऽप्यसौ दुहितुः सपुत्रायाः पत्या परिग्रहप्रियमस्माभिः श्रावयितव्यः। कः कोऽत्र भोः ?

संविभागो भवतु इति भावः)। दुहितरि=शकुन्तलायां, वत्सला=स्नेहवती, मेनका, मां परिचरन्ती= शुश्रूषमाणा, पुनरिह=आश्रमे, सन्निहितैव=उपस्थितैवास्ति। (मेनकया तु अत्रैव सन्निहितत्वात् सर्वमिदं ज्ञातमेवेति भावः।)

शकुन्तला—(आत्मगतम्) मे=मम, मनोगतम्=अभिप्रेतम्, भगवत्या=अदित्या, व्याहृतम्=उक्तम्। (तातकण्वस्यान्तिके यद् वार्ता प्रेषणं ममाभिप्रेतमासीत् तदेव भगवत्या प्रस्तुतम्।)

मारीचः—तपःप्रभावात्=तपोबलेन, तत्रभवतः=मान्यस्य, कण्वस्य=तन्नामकमहर्षेः, सर्वमिदम्=दुष्यन्तसमागमादिरूपं वृत्तान्तजातम्, प्रत्यक्षम्=अनभूयमानमस्ति।

राजा—अतः खलु=ध्यान(तपो)बलेन विदिताद्यन्तवृत्तान्तत्वादेव, मम सम्बन्धे, अनतिक्रुद्धः=नातिक्रुद्धः, मुनिः=कण्वः। (तपोबलेन विदिताद्यन्तवृत्तान्ततया दुर्वाससः शापवृत्तान्ते ज्ञातेऽपि कन्यादुःखदर्शनेन मयि किञ्चित् क्रुद्ध एवेति भावः।)

मारीचः—तथापि=विदिताखिलवृत्तान्तत्वेऽपि, कण्वस्य, सपुत्रायाः=पुत्रयुक्तायाः, दुहितुः=शकुन्तलायाः, पत्या=दुष्यन्तेन, परिग्रहप्रियम्=ग्रहणरूपप्रीतिकरविषयम्, अस्माभिः=मया, श्रावयितव्यः=निवेदयितव्यः। कः कोऽत्र भोः=सन्देशं कण्वमहर्षेः श्रावयितुं अस्ति कोऽप्यत्रोपस्थितः ?

शकुन्तला—(**स्वगत**) भगवती अदिति ने मेरे मन की बात कह दी।

मारीच—तपस्या के प्रभाव से महर्षि कण्व को यह सब प्रत्यक्षवत् विदित है।

राजा—इसीलिए तो वे मुझ पर विशेष क्रुद्ध नहीं होंगे।

मारीच—फिर भी पुत्र के साथ कन्या को उसके पति ने स्वीकार कर लिया है, यह आनन्ददायक समाचार हमें उन्हें सुनाना ही चाहिए। अरे! कोई है यहाँ ?

Śakuntalā*—*(To herself) Indeed, my heart's wish has been said by her reverence.

***Mārīca*—**Through the power of penence all this is visually present to his reverence Kaṇva.

***The king*—**Threfore, indeed, the sage will not be more angry on me?

***Mārīca*—**Never the less we should inform him of the happy event that his daughter with her son has been accepted by Duśyanta i.e. her husband. Who is here, who, ho?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिष्यः—(प्रविश्य) भगवन्! अहमस्मि।

मारीचः—वत्स! गालव! मद्वचनादिदानीमेव वैहायस्या गत्या तत्रभवते कण्वाय प्रियमावेदय यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन परिगृहीतेति।

शिष्यः—यथाज्ञापयन्ति गुरवः। (इति निष्क्रान्तः)

मारीचः—(राजानं प्रति) वत्स! त्वमपि सापत्यदारः सख्युराखण्डलस्य रथमारुह्य स्वां राजधानीं प्रतिष्ठस्व।

शिष्यः—(प्रविश्य=प्रवेशं विधाय) भगवन्! अयम्=अहम्, अस्मि=उपस्थितोऽस्मि।

मारीचः—वत्स=पुत्र! गालव! मद्वचनात्=मम वचनमवलम्ब्य, इदानीमेव=सपदि एव (तत्कालमेव), वैहायस्या=आकाशवर्त्तिन्या गत्या, तत्रभवते=पूज्याय, कण्वाय=कण्वमहर्षये, प्रियम्=प्रीतिकरं, आवेदय=सूचय, यथा—पुत्रवती=पुत्रयुक्ता, शकुन्तला, तस्याः=शकुन्तलायाः, यः शापः=दुर्वासःकृताभिसम्पातः, तस्य निवृत्तौ=अवसाने, तच्छापनिवृत्तौ, स्मृतिमता=शकुन्तला-परिणयविषये लब्धस्मृतिना, दुष्यन्तेन=राज्ञा, परिगृहीतेति।

शिष्यः—गुरवः (मान्यार्थे बहुवचनम्) यथाऽऽज्ञापयन्ति=यथा निर्दिशन्ति। (इति निष्क्रान्तः=प्रस्थितः)

मारीचः—(राजानं=दुष्यन्तं प्रति) वत्स! त्वमपि, सापत्यदारः=पुत्रकलत्रसहितः, सख्युः=सुहृदः, आखण्डलस्य=इन्द्रस्य, रथमारुह्य=स्यन्दने आरोहणं कृत्वा, स्वां=स्वकीयाम्, राजधानीम्=प्रधाननगरीम्, प्रतिष्ठस्व=गच्छ।

शिष्य—(**आकर**) यह मैं (उपस्थित) हूँ।

मारीच—वत्स गालव! अभी आकाशगामिनी गति से महर्षि कण्व के पास जाकर उन्हें मेरी ओर से यह सुखद समाचार दो कि पुत्रवती शकुन्तला को उसका शाप निवृत्त हो जाने के बाद, भूली स्मृति के लौट आने पर उसे राजा दुष्यन्त ने स्वीकार कर लिया है।

शिष्य—जैसी गुरुजनों की आज्ञा। (**प्रस्थान**)

मारीच—(**राजा से**) पुत्र! तुम भी पुत्र और पत्नी के साथ अपने मित्र इन्द्र के रथ में सवार होकर अपनी राजधानी को प्रस्थान करो।

Pupil—(Entering) Here I am, your reverence.

***Mārīca*—**My son Gālava! even now having gone be the sky, report this happy news to his reverence Kaṇva at my words thus—That Śakuntalā with her son has been accepted by Duśyanta, who gained memory at the cessation of her curse.

***Pupil*—**As your reverence commands. *(Exit.)*

***Mārīca*—**Child! you also, accompanied by your son and wife, start for your capital, mounting the chariot of your friend Indra.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(सप्रणामम्) यदाज्ञापयति भगवान्।

मारीचः—सम्प्रति हि—

तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञो वज्रिणं प्रीणयालम्।
युगशतपरिवृत्तैरेवमन्योन्यकृत्यै-
र्जयतमुभयलोकानुग्रहश्लाघनीयैः ॥ ३४॥

राजा—(सप्रणामम्=प्रणतिपूर्वकम्) यद्=यथा, आज्ञापयति=मां निर्दिशति, भवान्=त्वम्।

मारीचः—सम्प्रति हि=इदानीम्—

अन्वयः—विडौजाः तव प्रजासु विषये प्राज्यवृष्टिः भवतु, त्वमपि विततयज्ञः सन् वज्रिणं अलं प्रीणय। युगशतपरिवृत्तैः एवम् उभयलोकानुग्रहश्लाघनीयैः अन्योन्यकृत्यैः जयतम्॥ ३४॥

तवेति। विडौजाः=इन्द्रः, तव=भवतः, प्रजासु विषये, प्राज्या=प्रभूता, वृष्टिर्यस्मात् सः प्राज्यवृष्टिः, भवतु। त्वमपि=दुष्यन्तोऽपि, वितताः=सम्यक् सम्पादिताः, यज्ञाः येन सः विततयज्ञः सन्, वज्रिणम्=इन्द्रं, अलम्=पर्याप्तम् (अत्यर्थम्), प्रीणय=यज्ञभागैस्तर्पय। युगशतं=सत्यादिक्रमेण शतयुगं व्याप्य, परिवृतैः=जातिविनिमयैः, युगशतपरिवृतैः, एवम्=एवम्प्रकारैः, उभयोर्लोकयोः=स्वर्गमर्त्ययोः, अनुग्रहेण=यज्ञवृष्टिभ्यामुपकारेण, श्लाघनीयैः=प्रशंसनीयैः, उभयलोकानुग्रहश्लाघनीयैः, अन्योन्यकृत्यैः=पारस्परिककर्म्मभिः (अन्योन्यस्य=परस्परस्य, कृत्यैः= कर्तव्यैः), जयतम्=सर्वोत्कर्षेण वर्त्तेथाम्, युवामिति शेषः। अत्र परिवृत्तिरलङ्कारः। मालिनी नाम वृत्तम्॥ ३४॥

भावार्थः—मारीचः श्लोकेऽस्मिन् गमनारम्भसमुचितामाशिषं प्रयुङ्क्ते—इन्द्रः तव प्रजासु विषये प्राज्यवृष्टिर्भवतु तथा त्वमपि सम्यक्तया यज्ञादिकं सम्पादयित्वा स्वसुहृदं इन्द्रमलं प्रीणय। एवं स्वर्गमर्त्त्याधिपयोर्द्वयोर्युवयोः परस्परोपकार्य्योपकारकत्वसत्त्वात्प्रीतिभङ्गः कदापि मा भवत्विति भावः॥ ३४॥

राजा—(प्रणामपूर्वक) जैसी आपकी आज्ञा।

मारीच—अब से—

इन्द्र तुम्हारी प्रजा के हेतु प्रचुर वृष्टि करे और तुम भी यज्ञों के विस्तार से (प्रचुर यज्ञ करके) इन्द्र को पर्याप्त प्रसन्न करो। स्वर्ग और मर्त्य इन दोनों लोकों का हित साधन करने वाले प्रशंसनीय कार्यों द्वारा पारस्परिक हितसाधन करते हुए तुम दोनों सैकड़ों युगों तक उत्कर्ष लाभ करो॥ ३४॥

The king—(With salutation) As your reverence commands.

Mārīca—From this moment—

May Indra bestow bountifully of his rain towards your subjects. You also performing sacrifices please the Indra. Thus with reciprocal actions, laudable on account of the favours. Conforred on both the worlds, pass you both, the round of a hundred ages. (34)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—भगवन्! यथाशक्ति श्रेयसे यतिष्ये।

मारीचः—वत्स! किन्ते भूयः प्रियमुपहरामि?

राजा—अतः परमपि प्रियमस्ति? तथाप्येतदस्तु।

(भरतवाक्यम्)

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहती न हीयताम्।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः॥ ३५॥

(इति निष्क्रान्ताः सर्वे।)

इति सप्तमोऽङ्कः।

समाप्तमिदं महाकविश्रीकालिदासविरचितमभिज्ञानशाकुन्तलनामकं नाटकम्।

राजा—भगवन्! श्रेयसे=कल्याणाय, यथाशक्ति=शक्तिमनतिक्रम्य, यथासामर्थ्यम्, यतिष्ये=यत्नं करिष्ये।

मारीचः—वत्स=पुत्र! भूयः=पुनः, ते=तव सम्बन्धे, किं प्रियम्=इष्टम्, उपहरामि=उपनयामि, उपहाररूपेण प्रयच्छामि।

राजा—अतः परम्=अधिकम्, प्रियं=प्रीतिकरं वस्तु, अस्त्यपि=वर्त्तते किम्? तथापि एतद्=वक्ष्यमाणरूपम्, अस्तु=भवतु।

(भरतवाक्यम्=नटवाक्यम्; नाटकाभिनयसमाप्तौ सामाजिकेभ्यो नटेनाशीर्दीयते।)

अन्वयः—पार्थिवः प्रकृतिहिताय प्रवर्ततताम्, श्रुतिमहती सरस्वती न हीयताम्, परिगतशक्तिः आत्मभूः नीललोहितः ममापि च पुनर्भवं क्षपयतु॥ ३५॥

प्रवर्ततामिति। पार्थिवः=पृथिवीपतिः, प्रकृतिः=प्रजाः, तस्या हिताय=हितं कर्त्तुं, प्रवर्तताम्=प्रवृत्तिमान् भवतु, श्रुतौ=श्रवणविषये, महती=प्रशस्ता (श्रवणमधुरा), महती=प्रकाशित-

---

राजा—भगवन्! मैं यथाशक्ति कल्याण-प्राप्ति की चेष्टा करूँगा।

मारीच—पुत्र! और तुम्हारा क्या प्रिय कार्य करूँ?

राजा—क्या इससे भी बढ़कर प्रियकार्य हो सकता है? फिर भी यह हो।

(भरतवाक्य)

राजा प्रजा के हितसाधन में संलग्न हों, वेदों द्वारा जिसकी महिमा गायी जाती है वह

***The king*—**Your reverence! I shall strive for good according to my strength.

***Mārīca*—**Child! what further good shell I present to you?

***The king*—**Is there any good even greater than this. If your holiness even diseres to do something good, then let this be.

(The actor's speech)

May the king endeavour for the welfare of his subjects. May

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माहात्म्येति वा, सरस्वती=वाग्देवी कविकृतभारती वा, न हीयताम्=लोकैर्न त्यज्यताम्। परिगता=परितो व्याप्ता, शक्तिः=सामर्थ्यं, यस्य सः परिगतशक्तिः, यद्वा परिगता=मिलिता, देहार्धतामापन्ना, शक्तिः=शिवा, यस्य सः परिगतशक्तिः, आत्मना भवतीत्यात्मभूः=स्वयम्भूः, नीलश्चासौ लोहितश्चेति सः नीललोहितः=शिवः, ममापि च=दुष्यन्तस्य भरतस्य च (कालिदासस्येति च), पुनर्भवं=पुनर्जन्म, क्षपयतु=विच्छिनत्तु, तत्त्वज्ञानप्रदानेनेति भावः।

केचित्तु—'सरस्वती श्रुतिमहतां महीयताम्' इति पठन्ति। तत्र—श्रुत्या=वेदज्ञानेन शास्त्रश्रवणेन वा, महताम्=श्रेष्ठानाम्, ब्राह्मणानाम्, सरस्वती=वाणी, महीयताम्=पूजां लभताम्। अत्र पदार्थहेतुकं काव्यलिङ्गम्, वृत्त्यानुप्रासश्चालङ्कारौ। रुचिरावृत्तम्॥ ३५॥

भावार्थः—पार्थिवः प्रजाहिताय प्रवर्तताम्, श्रवणमधुरा वाग्देवी उत कविकृतभारती लोकैर्न त्यज्यताम्, तथा परिगतशक्तिः स्वयम्भूः शिवः तत्त्वज्ञानप्रदानेन मम कालिदासस्यापि पुनर्भवं क्षपयतु॥ ३५॥

(इति निष्क्रान्ताः सर्वे।)

सरस्वती (देववाणी) कभी विनष्ट न हो—उसे संसार के लोग त्यागें नहीं और आत्मभू शक्तिसंयुत भगवान् शिव हमारे पुनर्जन्म को निवृत्त कर दें॥ ३५॥

(सबका प्रस्थान)

सप्तम अंक समाप्त।

महाकवि कालिदास विरचित अभिज्ञानशाकुन्तल नामक नाटक समाप्त।

---

the speech of those that are eminent in learning be honoured and may the self born Śivā, whose power is all encompassing, put an end to my re-birth. (35)

(Exeunt all)

(End of act VII)

HERE ENDS THE DRĀMĀ NAMED ABHIJÑĀN ŚĀKUNTALA OF GREAT POET KĀLIDĀSA.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection